

[illegible] [illegible] [illegible] ।
आशा. तेहू-कुथियातं उपहार

15
10
5
0 centimeters 5 10 15 20 25

श्रीगणेशाय नमः ॥ अथ चूडाकरणं ॥ ॥ तत्र तृतीये वर्षे पुण्यदिने पिता व
ह्निः शालायां प्राङ्मुखः उपविष्टः मातृकापूजाभ्युदयिके कृत्वा कुशण्डि
कां कुर्य्यात् तत्र क्रमः ॥ अभ्युक्षनादिकर्म्म कर्तुं कुशप्रच्छादितमुदक
मानेतव्यं तत्रोत्तरपुरोदेशः समो वा परिशोध्यः ॥ कुशैर्हस्तमात्रं परि
समुह्य गोमयोदकेनोपलिप्य अग्निस्थापनपर्य्यन्तं वामहस्तं भूमा

मन्दास् सुगत दासया [illegible]
बाबा सफू-कुथियात उपहार।

पूजा ·
१

वारोप्य · दक्षिणजानुं भूमावेव पातयित्वा · फलपुष्पकुशानामञ्ज
लिं गृहीत्वा · रेखापञ्चकं कुर्यात् ॥ ततः प्रथमं पूर्वाग्रा · द्वादशाङ्गुल
प्रमाणा · पृथिवीदेवताका ध्येयः · पीतवर्णा लेखा लिखितव्या ॥ त
ल्लेखा पश्चिमभागसंलग्ना · उत्तराग्रा · एकविंशत्यङ्गुलप्रमाणाऽ
ग्निदेवताका ध्येयः · लोहितवर्णा लेखा लिखितव्या ॥ तल्लेखासंलग्ना

एम·

पूर्वाग्रलेखातः षडङ्गुलान्तराला ऊर्ध्वगामिनी प्रादेशप्रमाणा · प्रजापति
देवताका ध्येयः · कृष्णवर्णा लेखा लिखितव्या ॥ तस्या अपि षडङ्गुलान्त
राला · ऊर्ध्वगामिनी प्रादेशप्रमाणा · इन्द्रदेवताका ध्येयः · नीलवर्णा
लेखा लिखितव्या ॥ तस्या अपि षडङ्गुलान्तराला ऊर्ध्वगामिनी द्वादशा
ङ्गुलप्रमाणा · सोमदेवताका ध्येयः · शुक्लवर्णा लेखा लिखितव्या ॥ ए

चूडा·
२

वंलेखापञ्चकं कृत्वा ॥ ॥अनामिकाङ्गुष्ठाभ्यां ताभ्य एव मृदः उ
त्धृत्वा· ऐशान्यां क्षिपेत् ॥ ततो नलेन लेखा अभ्युक्षणं कृत्वा· सन्निधा
पितकांस्यभाजनस्थे ग्नौ ज्वलत्तृणं निरस्यत्यनेन ॥ प्रजापतिऋषि
स्त्रिष्टुप्छन्दोऽग्निर्देवता अग्निसंस्कारे विनियोगः ॥ ॐ क्रव्यादमग्निं
प्रहिणोमि दूरं यमराज्यं गच्छतु रिप्रवाहः ॥ ततोऽग्निं प्रणयेदनेन ॥ राम·

प्रजापतिऋषिर्वृहती छन्दो· वृहस्पतिर्देवता अग्निस्थापने विनियोगः
॥ॐ भूर्भुवः स्वः इत्यभिमुखमग्निं प्रणयेत् ॥ ततो वामहस्तं जानुचोत्था
प्य ॥ अञ्जलिं वध्वा ॥ ॐ इहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतु
प्रजा इत्यग्नेरुपस्थानं ॥ ततः पातित दक्षिणजानुः ॥ प्रादेशमि
तां समिधं घृताक्तां तूष्णीमग्नौ क्षिपेत् ॥ ततो ब्रह्मवरणं ॥ ततो येरण

0 centimeters 5 10 15 20

चूडा·
२

ग्निं परिक्रम्याग्नेर्द्दक्षिणत ऊर्द्ध्वजानुः प्रत्यङ्मुख उपविशन्· ब्रह्मासने·
प्राङ्मुखीम्बारिधारान्दत्वा· तस्या उपरि प्रागग्रान् कुशानास्तीर्य्य·
प्रत्यङ्मुख उपविशन्· वामहस्तानामिकाङ्गुष्ठाभ्यां· ब्रह्मासनाद्दर्भमेकं
गृहीत्वा· नैर्ऋत्यां क्षिपेदनेन॥ प्रजापतिरृषिर्गायत्री छन्दोग्निर्द्दे
वता· ब्रह्मासनातृणनिरसने विनियोगः॥ ॐ निरस्तः परावसुः इति

राम·

त्रिणान्निरस्य॥ ततः उदकमुपस्पृश्य·॥ ब्रह्माणमुपवेशयेदनेन॥
प्रजापतिरृषिस्त्रिष्टुप्छन्दोग्निर्द्देवता ब्रह्मोपवेशने विनियोगः
॥ ॐ आवसोः सदने सीद· इति पूर्व्वोक्तान्यतमं ब्रह्माणमुपवेशयेत्॥
ब्राह्मणस्य क्षेवरणाप्रतिवचनादिकस्तूक्ष्मं॥ ततो ब्रह्मोपरि प्रागग्रान्
कुशानास्तीर्य्य॥ जलेनाभ्युक्ष्य· ब्रह्माणं स्पृष्ट्वा जपेत्॥ प्रजापतिरृ

चूडा·

षिर्गायत्री छन्दो विष्णुर्देवता जपे विनियोगः ॥ ॐ इदं विष्णुर्विचक्र
मे त्रेधा निदधे पदं ॥ समूढमस्य पांसुले ॥ इति जप्त्वा तेनैव यथा
परावृत्य स्वस्थानं गछेत् ॥ ततः उपविश्य ॥ ततो दक्षिणजानुं पातई
त्वा उपरिकृत दक्षिणहस्तः करद्वयमधोमुखं भूमावारोप्य भू
मिजपं कुर्यात् ॥ परमेष्ठी ऋषिरनुष्टुप्छन्दोग्निर्देवता भूमिज

एम·

पे विनियोगः ॥ ॐ इदं भूमेर्भजामह इदं भद्र सुमङ्गलं ॥ परा सपत्ना
न्बाधस्वान्येषां विन्दते धनं ॥ रात्रौ वसुशब्दमुच्चारयेत् ॥ ततो जानू
त्थाप्य दक्षिणहस्तेन कुशत्रयं गृहीत्वा अग्नेरुत्तरादितः प्रदक्षिण
क्रमेण प्रतिकरचं परिसमूहयेत् ॥ कौत्स ऋषिर्जगती छन्दोग्निर्देव
ता पष्ठस्य षडहस्य षष्ठे अहन्यग्निमारुते शाले परिसमूहने विनियो

चूडा
५

गः॥ ॐ इमं स्तोममर्हते जातवेदसे रथमिव सम्महेमा मनीषया॥ भद्रा
हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषामा वयं तव ई त्यग्नेरुत्तरतः॥ ॐ
भरामेध्मं कृणवामा हवींषि चितयन्तः पर्वणा पर्वणा वयं॥ जीवात
वे प्रतरां साधया धियोऽग्ने सख्ये मा रिषामा वयं तव· ई ति पूर्वतः॥ ॐ श
केमत्वा समिधं साधया धियस्त्वे देवा हविरदन्त्याहुतं॥ त्वमादित्यां आ

राम·

वह तान्ह्युश्मस्यग्ने सख्ये मा रिषामा वयं तव· ई ति दक्षिणतः॥ परिसमुह्य
वर्हीभिस्तीर्य मूलान्याछादयन्· त्रिरावृत्तं· पश्चादुत्तरं वा· पुरस्ताद्दक्षिणा
तः॥ उत्तरतः पश्चात् स्तरणं कुर्यात्॥ ततः पूर्वोक्तान् खादिरादीन् वि
शतीध्मान् मूलमध्याग्रक्रमेण घृताक्तान् प्रादेशमात्रपरिमितान्· प्रजा
पतिं मनसा· ध्यात्वा· तूष्णीमग्नौ जुहुयात्॥ ततस्तस्मादेव वर्हिषः साग्रकु

चूडा·
६

शपत्रद्वयं गृहीत्वा· प्रादेशमात्रं कृत्वा कुशमन्तर्द्धाय छिंद्यादनेन ॥ प्रजा
पतिऋषिः पवित्रे देवते पवित्रछेदने विनियोगः ॥ ॐ पवित्रे स्थो वैष्णव्यौ·
ततो द्विरनुमृज्यादनेन ॥ प्रजापतिऋषिः पवित्रे देवते पवित्रसंमार्ज्ज
ने विनियोगः ॥ ॐ विष्णोर्मनसा पूते स्थः ॥ इति संमृज्याज्यस्थाल्यामुद
गग्रे पवित्रे निधायाज्यमावपेत् ॥ ततो व्यस्तहस्ताङ्गु· ष्ठोपकनिष्ठाभ्यां·

राम·

गृहीतपवित्राभ्यामाज्यमूर्द्धं नीत्वा· सकृदुत्क्षिपेदनेन ॥ प्रजापतिऋषि·
राज्यन्देवता· आज्योत्पवने विनियोगः ॥ ॐ देवस्त्वा सवितोत्पुनात्वछि
द्रेण पवित्रेण वसोः सूर्यस्य रश्मिभिः स्वाहा· ततो द्विस्तूष्णीं· ततः प
वित्रे जलेनाभ्युक्ष्य· तूष्णीमग्नौ क्षिपेत् ॥ ततः आज्यपात्रमुदकेनागम
न्याग्रे हव्यारी निधायाग्नेरुत्तरतो वा त्रेयमवतारयेत्· इत्याज्यसंस्कारः ॥

चूडा·
७

एवं कृत्वा संस्कारोपि ॥ ॥ ततः सभ्यनाम्न्यग्नौ तिलतण्डुलमुद्ग
साधितं स्थालीपाकं पचेत् स्ते चरौ तमवताप्ये· एकविंशतिदर्भपि
जलिः सप्त· सप्तत्रिधा वद्धाः उष्णोदकपूर्णं कांस्यपात्रं· ताम्रक्षुरं· आद
र्शं वा· क्षुरहस्तनापितं च· अग्ने दक्षिणतः स्थापयेत्· औदुम्बरं गोम न
यं· स्थालीपाकं चोत्तरतोग्ने स्थापयेत् ॥ ततो व्रीहियवतिलमाषैः प्रत्ये राम·

त्वा

कं पात्राणि पूरयित्वा· व्रीहियवाभ्यां· तिलमाषाभ्यां· मिलिताभ्यां च
पात्रद्वयं पूरयित्वा· उत्तरतः आग्नेः पुरतः स्थापयेत् ॥ ॥ अथ कर्ण
वेधः ॥ तत्र तृतीये वर्षे पंचमे वा पुष्येन्दु विशाखा चित्रा हरि रेवत्यन्यतमः
नक्षत्रे शुभतिथौ पूर्वाह्णे पितान्यो वा पूर्वाभिमुखोपविष्टः कुमारस्य
दक्षिणाकर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ॥ स्थिरै
र्णमभिमंत्रयति तत्र मंत्रः ॥ ॐ भद्रं क १

चूडा·
८

रङ्गैस्तुष्टुवांसस्तनूभिर्व्यशेमहि देवहितं मदायुः ॥ इति ततो वामक
र्णे मभिमंत्रयति ॐ वक्षं निवेदा गनीगन्ति कर्णे प्रियं सखायं परिष
स्वजाना ॥ पोषेव शिंके वितताधि धन्वंज्या इयं समने पारयंन्ती ॥ इ
ति मंत्रेण ॥ ततो मध्यं निशिक्ष्य नापित द्वारा वेधयेत् ॥ तस्मिन्नेवाव
सरे मधुरादिदानमाचारात् ॥ ततो ब्राह्मणभोजनं ॥ इति कर्णवेध· राम·

ततो भूगतदक्षिणजानुः उदकस्थालीमये कृत्व· अग्निः पर्युक्षणं
कुर्यात् ॥ प्रजापतिऋषिरदितिर्देवतोदकाञ्जलिप्रसेचने विनि
योगः ॥ ॐ अदितेअनुमन्यस्व· इत्यग्नेर्दक्षिणतः पूर्वायामञ्जलि
धारान्दद्यात् ॥ प्रजापतिऋषिरनुमतिर्देवतोदकाञ्जलिप्रसेचने
विनियोगः ॥ ॐ अनुमतेअनुमन्यस्व· इत्यग्नेः पश्चादुत्तराग्रां ॥ प्रजाप

0 centimeters 5 10 15 20

चूडा·
९

निऋषिः सरस्वती देवतोदकाञ्जलिप्रसेचने विनियोगः ॥ ॐ सरस्व
त्यनुमन्यस्व· इत्यग्नेरुत्तरतः पूर्व्वायामञ्जलिधारां दद्यात् ॥ प्रजापति
ऋषिस्त्रिष्टुप्छन्दः सविता देवता अग्निपर्युक्षणे विनियोगः ॥ ॐ देव
सवितः प्रसुव यज्ञं पतिं भगाय ॥ दिव्यो गन्धर्व्वः केतपूः केतन्नः पुनातु·
वाचस्पतिर्व्वाचन्नः स्वदतु· इति होमीयद्रव्यसहितस्याग्नेर्विपरीतवा

राम·

प्रसुव यज्ञ २

रि धारयावेष्टनं कुर्य्यात् ॥ ततो जान्वाच्य समिधमेकां कुशपुष्प·
फलसहितां गृहीत्वा· उपरि कृतदक्षिणहस्तो विरूपाक्षं जपेत् ॥ प
रमेष्ठी ऋषिर्न्निगदछन्दः कालाग्निरुद्ररूपोग्निर्द्देवता विरूपाक्ष
जपे विनियोगः ॥ ॐ तपश्च तेजश्च श्रद्धा च ह्रीश्च सत्यं चाक्रोधश्च·
त्यागश्च धृतिश्च धर्म्मश्च सत्वञ्च वाक्च मनश्चात्मा च ब्रह्म च· ता

चूडा·
१०

निप्रपद्ये·तानिमामवन्तु·ॐभूर्भुवःस्वरोँमहान्तमात्मानंप्रपद्ये·विरू
पाक्षोसिदन्तांजिस्तस्यते·शय्यापर्णेगृहान्तरिक्षे·विमितंहिरण्मयं
तद्देवानांहृदयान्ययस्मये·कुम्भेअन्तःसन्निहितानि·तानिबलभृच्च
बलसाच्चरक्षतोप्रमत्तो·अनिमिषतू·तःसत्यंयत्तेद्वादशपुत्रास्ते·त्वा
सम्वत्सरे·सम्वत्सरेकामप्रेणयज्ञेनयाजयित्वा·पुनर्ब्रह्मचर्यमु

राम·

पयन्ति त्वं·देवेषुब्राह्मणोस्यहं·मनुष्येषुब्राह्मणोवैब्राह्मणमुप
धावत्युपत्वाधावामिजपन्तं·मामाप्रतिजापीर्जुहून्तं·मामाप्रतिहौ
सिःकुर्वन्तं·मामाप्रतिकार्षीस्त्वांप्रपद्ये·त्वयाप्रसूतइदंकर्मकरि
ष्यामि·तन्मेराध्यतां·तन्मेसमृध्यतां·तन्मेउपपद्यतां·समुद्रोमावि·
श्वव्यचा·ब्रह्मानुजानातु·तुथोमाविश्ववेदाब्रह्मणःपुत्रोनुजानातु·श्वा



कूडा·
११

यो माप्रचेता मैत्रावरुणेनुजानातु· तस्मै विहृपाक्षाय दन्ताञ्जये स
मुद्राय विश्वव्यचसे तुथाय· विश्ववेदसे श्वात्राय प्रचेतसे सहस्राक्षाय·
ब्रंह्मण· पुत्राय नमः॥ इति मंत्रेण कुशमेशान्यां न्यस्त्वा· फलपुष्पं
ब्रंह्मणे निवेद्य· पाणिना दक्षिणाजानुः॥ घृताक्तां समिधं कूर्ची मग्नौ
क्षिपेत्॥ ततस्तस्य संस्कृतस्य नाम्नोऽग्नेः पश्चाद्वक्ष्याप·व्याहृति

एम·



होमं कुर्यात्॥ ॥प्रजापतिरृषिर्गायत्री छन्दोऽग्निर्देवता व्याहृतिहो
मे विनियोगः॥ ॐ भूः स्वाहा॥ प्रजापतिरृषिरुष्णिक् छन्दो वायुर्देवता
व्याहृतिहोमे विनियोगः॥ ॐ भुवः स्वाहा॥ प्रजापतिरृषिरनुष्टुप् छन्दः सू
र्यो देवता व्याहृतिहोमे विनियोगः॥ ॐ स्वः स्वाहा॥ प्रजापतिरृषिर्बृ
हती छन्दो बृहस्पतिर्देवता महाव्याहृतिहोमे विनियोगः॥ ॐ भूर्भुवः

0 centimeters 5
10
15
20

चूडा·
१२

स्वः स्वाहा ॥ ततो माता शुचिना वस्त्रेण· कुमारमाछाद्य ग्नेः पश्चादुत्तरा
ग्रेषु· कुशेषु प्राङ्मुखौ उपविशेत् ॥ चूडाकरणकर्त्ता तस्याः पश्चादू
र्द्धं स्थितः प्राङ्मुखः सन· सवितारं मनसा ध्याय़न्· क्षुरहस्तं नापितं· प्रे
क्षमानो जपेत् ॥ प्रजापतिऋषिः सवितादेवता चूडाकरणे क्षुरहस्त
नापितप्रेक्षणे विनियोगः ॥ ॐ आय़मगात्सविताक्षुरेण· ततो वायु

राम·

ध्याय़न्· उष्णोदकपूर्णकांस्यपात्रं प्रेक्षमानो जपति ॥ प्रजापतिऋ
षिर्वायुर्द्देवता· चूडाकरणे· उष्णोदककांस्यप्रेक्षणे विनियोगः ॥ ॐ
उष्णेन वाय़ उदकेनैधि· ततः उष्णोदककांस्या दक्षिणेन पाणिना·
उष्णोदकमादाय़· दक्षिणां जुटिकां सिंचेदनेन ॥ प्रजापतिऋषि
रापोदेवता· चूडाकर्म्मणि जुटिकासेकदने विनियोगः ॥ ॐ आपउं

चूडा·
१३

दन्तुजीवसे ।। ततस्ताम्रक्षुरं प्रेक्षमाणो जपति ।। प्रजापतिरृषिः क्षु
रो देवता· चूडाकर्म्मणि ताम्रक्षुरप्रेक्षणे विनियोगः ।। ॐ विष्णोर्दं·
ष्ट्रोसि· ततः पूर्वोपकल्पिताः सप्तदर्भपिञ्जलिं गृहीत्वा· उर्द्धमू
लाः दक्षिणजुटिकायां निदधाति ।। प्रजापतिरृषिरोषध्यो देवता·
चूडाकर्म्मणि अग्निशिरोग्रदर्भपिञ्जलीनिधाने विनियोगः ।। ॐ

राम·

यां

ओषधे त्रायस्वैनं· ततो दर्भपिञ्जलीभिः सहितां जुटिकां· वामहस्तेन गृ
हीत्वा· उर्द्धमूलां जुटिका निदधाति ।। प्रजापतिरृषिः स्वधितिर्द्देवता चू
डाकर्म्मणि जुटिकायां क्षुरनिधाने विनियोगः ।। ॐ स्वधिते मैनं हिंसीः
ततः क्षुरेः केशच्छेदमकुर्वन् सकृत् प्राक्षुरं प्रेरयेदनेन ।। प्रजापतिरृ
षिः पूषा देवता चूडाकर्म्मणि कपुञ्जिकायां क्षुरप्रेरणे विनियोगः ।। ॐ

0 centimeters 5 10 15 20

चूडा·
१४

येनपूषाबृहस्पतेर्वायोरिन्द्रस्यचावपत्॥तेनतेवपामिब्रह्मणाजी
वातवेजीवनायदीर्घायुस्त्वायबलायवर्चसे·इतिसकृत्॥ततोद्विरू
र्ध्वंप्रेरयेत्॥ततोलौहक्षुरेणजुटिकांछित्वा·सहदर्भपिंजलीभिःस
हितां·तस्मिन्नेव·पूर्वस्थापितेआनडुहगोमयेस्थापयेत्॥ ॥
एतदनन्तरंकृकाटिकोपरि·बद्धजुटिकायांकपुछलाभिधानायां·

राम·

सिंचनादिपूर्ववत्कुर्य्यात्॥प्रजापतिऋषिरापोदेवता·चूडाकर्म्मणि
कपुछलक्लेदनेविनियोगः॥ॐआपउंदन्तुजीवसे॥ततस्ताम्रक्षुरंप्रे
क्षमाणोजपति॥प्रजापतिऋषिःक्षुरोदेवता·चूडाकर्म्मणिताम्रक्षुर
प्रेक्षणेविनियोगः॥ॐविष्णोर्दंष्ट्रोसि·ततःसप्तदर्भपिंञ्जलीर्गृही
त्वा·ऊर्द्ध्वमूलाःकपुछलेनिदधाति॥प्रजापतिऋषिरोषध्योदेव

चूडा·
१५

ता· चूडाकर्म्मणि अग्निशिरो यद्दर्भपिञ्जलिनिधाने विनियोगः॥ ॐ
ओषधे त्रायस्वैनं· ततो दर्भपिञ्जलीभिः सहितां जुटिकां· वामहस्तेन गृही
त्वा· दक्षिणहस्तेन ताम्रक्षुरं कपुछले निदधाति॥ प्रजापति ऋषिः स्व
धितिर्द्देवता चूडाकर्म्मणि कपुछले क्षुरनिधाने विनियोगः॥ ॐ स्वधि
ते मैनं हिंसीः ततस्ताम्रक्षुरं केशछेदमकुर्वन्नः सकृत् प्राञ्मुखं प्रेरयेद

राम·

नेन॥ प्रजापतिऋषिः पूषादेवता चूडाकर्म्मणि कपुछले क्षुरप्रेरणे
विनियोगः॥ ॐ येन पूषा बृहस्पतेर्वायोरिन्द्रस्य चावपत्॥ तेन ते वपा
मि ब्रह्मणा जीवातवे जीवनाय दीर्घायुत्वाय बलाय वर्च्चसे॥ ततो द्वि
तीयां प्रेरयेत्॥ ततो लोहक्षुरेण कपुछलं छित्वा· सह दर्भपिञ्जलीभिः
सहितां· तस्मिन्नेवानडुहगोमये स्थापयेत्॥ ततः उत्तरजुटिकां· कपुछि



चूडा.
१६

कायांभिधानायां पुनः सिंचनादि पूर्ववत् कुर्यात् ॥ प्रजापतिऋषिरा
पो देवता चूडाकर्म्मणि कपुञ्जिकाछेदने विनियोगः ॥ ॐ आपउंदंतु
जीवसे ॥ ततस्ताम्रक्षुरं प्रेक्षमाणो जपति ॥ प्रजापतिऋषिः क्षुरो देवता चू
डाकर्म्मणि ताम्रक्षुरप्रेक्षणे विनियोगः ॥ ॐ विष्णो र्दंष्ट्रोसि ततः सप्त
दर्भपिञ्जलीर्गृहीत्वा ऊर्द्ध्वमूलास्तत्र जुटिकायां निदधाति ॥ प्रजापति

रामं.



ऋषिरोषध्यो देवता चूडाकर्म्मणि अभिशिरोग्रदर्भपिञ्जलीनिधाने वि
नियोगः ॥ ॐ ओषधेत्रायस्वैनं ततो दर्भपिञ्जलीभिः सहितां जुटिकां वाम
हस्तेन गृहीत्वा दक्षिणहस्तेन ताम्रक्षुरं कपुञ्जिकायां निदधाति ॥ प्रजा
पतिऋषिः स्वधितिर्देवता कर्म्मणि कपुञ्जिकायां क्षुरस्निधाने विनियोगः ॥ ॐ
स्वधिते मैनं हिंसीः ततस्ताम्रक्षुरं केशछेदनं कुर्यात् सकृत् प्राक्सुखं प्ररयेदनेनः

चूडा

0 centimeters 5
10
15
20

चूडा·
७

॥प्रजापतिर्ऋषिः पूषा देवता चूडाकर्म्मणि कपुच्छिकायां क्षुरप्रेरणे विनियोगः
॥ॐ येन पूषा बृहस्पतेर्वायोरिन्द्रस्य चावपत्॥ तेन ते वपामि ब्रह्मणा जीवात
वे जीवनाय दीर्घायुष्ट्वाय वर्च्चसे॥ ततो द्विस्तूष्णीं प्रेरयेत्॥ ततो लौ
हक्षुरेण कपुच्छिकां छित्वा· सहदर्भपिञ्जलीभिः सहितां· तस्मिन्नेवानडु
हगोमये स्थापयेत्॥ ॥ततः पाणिभ्यां कुमारस्य· मूर्द्धानं परिगृह्य जपेत्॥

एम·

प्रजापतिर्ऋषिरुष्णिक्छन्दो जामदग्न्यादयो देवता कुमारस्य मूर्द्धानं शिर
परिगृह्य जपे विनियोगः॥ ॐ त्र्यायुषं जमदग्नेः॥ कश्यपस्य त्र्यायुषं॥ अग
स्त्यस्य त्र्यायुषं॥ यद्देवानां त्र्यायुषं॥ तन्नो अस्तु त्र्यायुषं॥ ॥ततो ग्नेरुत्तर
तः· कुमारं नीत्वा यथाकुलं· तस्य· कुमारस्य· चूडां कारयेत्॥ ॥ततः उप
विश्य॥ ततो व्याहृतिहोमं कुर्यात्॥ प्रजापतिर्ऋषिर्गायत्री छन्दो ग्निर्देवता

0 centimeters 5 10 15 20

चूडा·
१८

व्याहृति होमे विनियोगः ॥ ॐ भूः स्वाहा ॥ प्रजापतिऋषिरुष्णिक्छन्दो वायु
र्देवता व्याहृति होमे विनियोगः ॥ ॐ भुवः स्वाहा ॥ प्रजापतिऋषिरनुष्टुप्छन्दः
सूर्यो देवता व्याहृति होमे विनियोगः ॥ ॐ स्वः स्वाहा ॥ प्रजापतिऋषिर्बृह
ती छन्दो· बृहस्पति र्देवता महाव्याहृति होमे विनियोगः ॥ ॐ भूर्भुवः स्वः स्वा
हा ॥ ॥ अथ यदि शाट्यायनहोमः क्रियते· तदा पद्धतिशेषे अन्वेष्टव्यः राम·

॥ ततः प्रादेशमितां समिधं घृताक्तां तूष्णीमग्नौ क्षिपेत् ॥ ततः पुनर्भूगतद
क्षिणजानुः उदकस्थालीमग्ने कृत्व· अग्नेः पर्युक्षणादिकं कुर्यात् ॥ प्रजा
पतिऋषिस्त्रिष्टुप्छन्दः सविता देवता अग्निपर्युक्षणे विनियोगः ॥ ॐ देवस
वितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय· दिव्यो गन्धर्वः केतपूः केतं नः पुनातु·
वाचस्पतिर्वाचं नः स्वदतु· इति होमीयद्रव्यसहितस्याग्नेर्विपरीतवारिधा

0 centimeters 5 10 15 20

चूडा.
१९

ण्यावेषणं ।। प्रजापतिऋषिरदितिर्देवतोदकाञ्जलिप्रसेचने विनियोगः
।। ॐ अदितेऽनुमंस्याः इत्यग्नेर्दक्षिणतः पूर्व्वाग्रां ।। प्रजापतिऋषिरनुमति
र्देवतोदकाञ्जलिप्रसेचने विनियोगः ।। ॐ अनुमतेऽन्वमंस्याः इति पश्चा
दुत्तराग्रां ।। प्रजापतिऋषिः सरस्वती देवतोदकाञ्जलिप्रसेचने विनियोगः ।।
ॐ सरस्वत्यनुमंस्याः इत्युत्तरतः पूर्व्वाग्रां. इति पूर्व्वविपरीतामञ्जलिधारां द

राम.

द्यात् ।। ततस्तरणक्रमेण वर्हिः स्थाप्य. जुटिकां वध्वा. वामहस्ते कृत्वा ।। प्रजाप
तिऋषिर्व्वायोर्देवता दर्भतृणाभ्यञ्जने विनियोगः ।। ॐ अक्तुं विहानाव्य
न्तुवयः इति मूलमध्याग्रक्रमेणाज्येनाभ्यनक्ति ततो जलेनाभ्युक्षाग्नौ क्षि
पेदनेन ।। प्रजापतिऋषिरनुष्टुप्छन्दो रुद्रो देवता. दर्भजुटिकाहोमे विनि
योगः ।। ॐ यः पशूनामधिपती रुद्रस्तन्तिचरो वृषा. पशूनस्माकं माहिंसीरे

0 centimeters 5 10 15 20

चूडा·
२०

तदस्तुहुतनेव स्वाहा॥ ततः उत्थाय· कुमारः दक्षिणहस्तस्य ष स्रुवेण फल
पुष्प घृत पूर्णेन· पूर्णाहुतिं दद्यादनेन॥ प्रजापतिऋषिर्विराट् छन्दः इन्द्रो
देवता यशस्कामस्य प्रजनीय प्रयोगे विनियोगः॥ ॐ पूर्णहोमं यशसे जु
होमि· यो स्मै जुहोति· वरमस्मै ददाति॥ वरं वृणे यशसा भामि लोके स्वा
हा· ततः ॐ वसुभ्यः स्वाहा· इत्यविच्छिन्नामाज्यधारां दद्यात्॥ ततो ब्रह्मद

एम·

क्षिणा॥ कुशाञ्च प्रोक्षनजलान्यादाय॥ ॐ अद्य कृतैतच्चूडाकरणहोमक
र्म्मणि कृताकृतावेक्षणरूप ब्रह्मकर्म्म प्रतिष्ठार्थमिदं पूर्णपात्रं प्रजाप
तिदैवतं ब्रह्मणे दक्षिणां नमः॥ ॥ ततोग्निप्रदक्षिणक्रमेण हस्तन्नी
त्वा· ब्रह्मोत्थापनं· ग्रन्थिविमोको वा॥ ततः स्रुवेण भस्मानीय· त्र्यायुषकर
णं॥ ॐ त्र्यायुषं जमदग्नेरिति हृदि॥ ॐ कश्यपस्य त्र्यायुषमिति दक्षि

चूडा·
२१

णवाहुमूले ॥ ॐ अगस्त्यस्य त्र्यायुषमिति· वामवाहुमूले ॥ ॐ यद्देवानां
त्र्यायुषमिति कण्ठे ॥ ॐ तन्नो अस्तु त्र्यायुषमिति शिरसि· विन्दुं कुर्य्यात् ॥
एवं कुमारपक्षे ॥ तत्र तन्नो इत्यस्य स्थाने· तन्ते इति विशेषः ॥ ततः पात्रस्थं
जलमपनीय पात्रं जलान्तरेण पूर्य्य· तत्र कुसुमं प्रक्षिप्य ॥ दक्षिणादा
नं ॥ कुशत्रयाक्षतजलान्यादाय ॥ ॐ अद्य कृतैतच्चूडाकरणहोमकर्म्म

एम·

प्रतिष्ठार्थं गामेकां रुद्रदैवतां· यथानामगोत्राय ब्राह्मणाय· दक्षिणा
त्वानुमहं सम्प्रदज्ये ॥ यथाशक्ति सुवर्णं वा ॥ ततः पूर्व्ववद्वामदेव्यगानं
॥ ततः कृशरस्थालीपाकमासादित व्रीहियवादिकञ्च· नापिताय प्रति
पादयेत् ॥ ततः आचाराद्धृतकेशमानडुहगोमयं सपद्मिनीके जले क्षि
पेत् ॥ ॥ इति चूडाकरणकर्म्म समाप्तं शुभम् ॥ ॥

चूडा·
२२

राम:

श्रीगणेशाय नम॥ अथोपनयनं॥ तत्र आचार्य्यवरणपक्षे॥ ॐ अद्यामुकमासीयामुकपक्षीयामुकतिथौ· अमुकगोत्रममुकशर्म्माणं वा ब्राह्मणामेभिः पुष्पचन्दनताम्बूलवासोभिरात्मानमुपनयनायितुमाचार्य्यत्वेन त्वामहं वृणे॥ ॐ वृतोस्मीति प्रतिवचनं· ॐ यथाविहितं कर्म कुरु· ॐ करवाणीति प्रतिवचनं॥ ॥ तत्र गर्भाष्टमे अष्टमे वा वर्षे· अनुकल्पे·

उप.
२२

षोडशवर्षाभ्यन्तरे. उपनयनदिने. प्रातरेव ब्राह्मणत्रयसहितस्य मा
नवकस्य भोजनं. मानवकभोजनञ्च किञ्चिद्दुग्धपानामेकमेव ॥
ततो मुण्डनं ॥ ततः स्नानं ॥ ततः कुण्डलादिना यथाशक्त्यलंकरणं ॥
ततो नूतनैकवस्त्रपरिधानं ॥ ततः आचार्यो मातृकापूजाभ्युदयिके
कृत्वा. पुरस्तात् वहिःशालायां प्राङ्मुख उपविष्टः गोमयोपलिप्तदेशे.

राम.

कुशण्डिकां कुर्य्यात्. तत्र क्रमः ॥ अभ्युक्षणादिकर्म्मकर्त्तुं कुशप्रच्छादि
तमुदकमानेतव्यं. कुशेर्हस्तमात्रं पूर्व्वोत्तरप्लवं समम्वादेशे परिसमुह्य.
गोमयोदकेनोपलिप्य. अग्निस्थापनपर्य्यन्तं वामहस्तं भूमावारोप्य.
दक्षिणजानुं भूमारेवपातयित्वा. फलपुष्पकुशानामन्यतमं गृही
त्वा. रेखापञ्चकं कुर्य्यात् ॥ तत्र प्रथमं पूर्व्वाया. द्वादशाङ्गुलप्रमाणा.

उप·
२४

पृथिवीदेवताकाधेयः पीतवर्णा लेखा लिषितव्या ॥ तल्लेखापश्चिम
भागसंलग्ना· उत्तराग्रा· एकविंशत्यङ्गुलप्रमाणा· अग्निदेवताका
ध्येयः लोहितवर्णा लेखा लिखितव्या ॥ तल्लेखासंलग्ना पूर्वाग्रले
खातः षडङ्गुलान्तराला पूर्वगामिनी प्रादेशप्रमाणा· प्रजापतिदेव
ताकाध्येयः कृष्णवर्णा लेखा लिखितव्या ॥ तस्या अपि षडङ्गुलान्तरा

एम·

ला· पूर्वगामिनी प्रादेशप्रमाणा· इन्द्रदेवताकाध्येयः· नीलवर्णा लेखा लि
खितव्या ॥ तस्या अपि षडङ्गुलान्तराला पूर्वगामिनी· द्वादशाङ्गुलप्र
माणा· सोमदेवताकाध्येयः· शुक्लवर्णा लेखा लिषितव्या ॥ एवं ले
खापञ्चकं कृत्वा ॥ अनामिकाङ्गुष्ठाभ्यां· ताभ्य एव मृदः खनित्वा·
ऐशान्यामरत्निमात्रे देशे क्षिपेत् ॥ ततो जलेन लेखाभ्युक्षणं कृत्वा· ॥

0 centimeters 5 10 15 20

उप. ततः सन्निधापितकांस्यभाजनस्थेग्नौ· ज्वलन्तृणं निरस्येत्यनेन ॥ प्र
२५ जापतिऋषिस्त्रिष्टुप्छन्दो अग्निर्देवता अग्निसंस्कारे विनियोगः ॥ ॐ
क्रव्यादमग्निं प्रहिणोमि दूरं यमराज्यं गच्छतु रिप्रवाहः ॥ ततोऽग्निं प्रण
येदनेन ॥ प्रजापतिऋषिर्वृहती छन्दो वृहस्पतिर्देवता अग्निस्थापने
विनियोगः ॥ ॐ भूर्भुवः स्वः इत्यभिमुखमग्निं प्रणयेत् ॥ ततो वामह राम·

स्तं जानु चोत्थाप्य ॥ अञ्जलिबद्ध्वा ॥ ॐ इहेवायमितरो जातवेदा देवेभ्यो
हव्यं वहतु प्रजानन् इत्यग्नेरुपस्थानं ॥ ततः पातितदक्षिणजानुः प्रादे
शमितां समिधं घृताक्तां तूष्णीमग्नौ क्षिपेत् ॥ ततो· ब्रह्मावरणं ॥ ॐ
अद्य कर्तव्योपनयनहोमकर्म्मणि कृताकृतावेक्षणरूपब्रह्मकर्म्म
कर्तुं त्वं मे ब्रह्मा भव· इति ब्रह्माणं वृणुयात् ॥ ततो यस्ताग्निं परिस्त


15
10
5
0 centimeters 5
10
15
20

उप·
२६

म्याग्ने र्द्दक्षिणत ऊर्द्धजानुः प्रत्यङ्मुखस्तिष्ठन· ब्रह्मासने· प्राङ्मुखी
म्वारिधारां दत्वा· तस्याउपरि प्रागग्रान्कुशानास्तीर्य्य· प्रत्यङ्मुखस्ति
ष्ठन· वामहस्तानामिकाङ्गुष्ठाभ्यां· ब्रह्मासनाद्दर्भमेकं गृहीत्वा·नै
ऋत्यां क्षिपेदनेन॥ प्रजापतिरृषिर्गायत्री छन्दोऽग्निर्द्देवता· ब्रह्मास
नात्तृणनिरसने विनियोगः॥ ॐ निरस्तः परावसुः इतितृणं निरस्य॥ ततः

राम·

उदकमुपस्पृस्य॥ ब्रह्माणमुपवेशयेदनेन॥ प्रजापतिरृषिस्त्रिष्टुप्
छन्दोऽग्निर्द्देवता ब्रह्मस्थापने विनियोगः॥ ॐ आवसोः सदने सीद· इ
तिछचाद्यम्पतमं ब्रह्माणमुपवेशयेत्॥ ततो ब्रह्मोपरि प्रागग्रकुशा
नास्तीर्य्य· जलेनाभ्युक्ष्य· ब्रह्माणं स्पृष्ट्वा जपेत्॥ प्रजापतिरृषिर्गा
यत्री छन्दो विष्णुर्द्देवता जपे विनियोगः॥ ॐ इदं विष्णुर्विचक्रमे त्रेधा

उप·
२७

निदधे पदं। समूढमस्य पांसुले। इति जप्त्वा तेनैव पथा परा परावृत्य स्व
स्थानं गच्छेत्॥ ब्राह्मणपक्षे तु वरणप्रतिवचनादिक सूक्ष्मं॥ ततः उ
पविश्य॥ दक्षिणजानुं पातयित्वा· उपरिकृतदक्षिणहस्तः करद्वय
मधोमुखं भूमावारोप्य भूमिजपं कुर्यात्॥ परमेष्ठी ऋषिरनुष्टु
प्छन्दोग्निर्देवता भूमिजपे विनियोगः॥ ॐ इदं भूमेर्भजामहइदंभ

राम·

द्रं सुमङ्गलं॥ परा सपत्नान्बाधस्वान्येषां विन्दते धनं॥ हाचौ वस्तुशब्दप्र
योगः॥ ततो जानु स्थाप्य· दक्षिणहस्तेन कुशत्रयं गृहीत्वा· अग्नेरुत्तरा
दितः प्रदक्षिणक्रमेण प्रतिऋचं परिसमूहयेत्॥ कौत्स ऋषिर्जग
तीछन्दोग्निर्देवता पक्षस्य षडहस्य षष्ठे अहन्यग्निमारुते शस्त्रे प
रिसमूहने विनियोगः॥ ॐ इमं स्तोममर्हते जातवेदसे रथमिव स

उप· म्महेमा मनीषया ॥ भद्रा हि नः प्रमतिरस्य संसद्यग्ने सख्ये मा रिषा
२८ मा वयं तव· इत्यग्ने रुत्तरतः ॥ ॐ भरामेध्मं कृणवामा हवींषि चितेचि
तयन्तः पर्वणा पर्वणा वयं ॥ जीवातवे प्रतरां साधया धियोग्ने सख्ये
मा रिषामा वयंन्तव· इति पूर्वतः ॥ ॐ सकेम त्वा समिधं साधया धियस्
त्वे देवा हविरदन्त्याहुतं ॥ त्वमादित्यां आवह तां ह्युश्मस्यग्ने सख्ये एम·

मा रिषामा वयं तव· इति दक्षिणतः ॥ परिसमूह्य· बर्हिभिरग्रैर्मूला
न्याछादयन्· शिरावृत्तं पश्चाद्वृत्तं वा· पुरस्ताद्दक्षिणतः· उत्तरतः प
श्चात्स्तरणं कुर्यात् ॥ ततः पूर्वोक्तान् खादिराद्यान् विंशति ध्मान्
मूलमध्याग्रक्रमेण· घृताक्तान्· प्रादेशद्वयपरिमितान्· प्रजापतिं
मनसा ध्यात्वा· तूष्णीमग्नौ जुहुयात् ॥ ततस्तान्देवबर्हिषः साग्रकु

0 centimeters 5 10 15 20

उप· शपत्रद्वयं गृहीत्वा· प्रादेशमात्रं कृत्वा· कुशमन्तर्द्धाय छिंद्यादनेन॥
२९ प्रजापतिऋषिः पावित्रे देवते· पवित्रच्छेदने विनियोगः॥ ॐ पवित्रे स्थो
वैष्णव्यौ· ततोऽद्भिरनुमृज्यादनेन॥ प्रजापतिऋषिः पवित्रे देवते पवि
त्रसम्मार्ज्जने विनियोगः॥ ॐ विष्णोर्मनसा पूतेस्थः॥ इति संमृज्या
ज्यस्थाल्यामुदगग्रे पवित्रे निधायाज्यमावपेत्॥ ततो व्यस्तहस्ताङ्गु एम·

ष्ठोपकनिष्ठाभ्यां· गृहीतपवित्राभ्यामाज्यमूर्द्धं नीत्वा· सकृदुत्क्षि
पेदनेन॥ प्रजापतिऋषिराज्यन्देवता· आज्योत्पवने विनियोगः॥ ॐ
देवस्त्वा सवितोत्पुनात्वच्छिद्रेण पवित्रेण वसोः सूर्य्यस्य रश्मि[illegible]भि
स्वाहा· ततो द्विस्त्रूल्मीं क्षिपेत्· ततः पवित्रे जलेनाभ्युक्ष्य· स्त्रूलीमग्नौ
क्षिपेत्॥ ततः आज्यपात्रमुदकेनानुमृज्याग्नेरुपरि निधायाग्नेरु

उप·
३०

त्तरतोवारंचरुमवतारयेत्‌· इत्याज्यसंस्कारः॥ ॥एवं स्रुवसं
स्कारोपि॥ ॥ततोभूगतदक्षिणजानुः उदकस्थालिमध्येकृ
त्य॥ अग्निः पर्युक्षणं कुर्यात्‌॥ प्रजापतिऋषिरदितिर्देवतोदका
ञ्जलिप्रसेचनेविनियोगः॥ ॐ अदितेऽनुमन्यस्व· इत्यग्नेर्दक्षि
णतः पूर्वायां॥ प्रजापतिऋषिरनुमतिर्देवतोदकाञ्जलिप्रसेचने

एम·

विनियोगः॥ ॐ अनुमतेऽनुमन्यस्व· इत्यग्नेः पश्चादुत्तरायां॥ प्रजापति
ऋषिः सरस्वतीदेवतोदकाञ्जलिप्रसेचनेविनियोगः॥ ॐ सरस्वत्यनुमन्य
स्व· इत्यग्नेरुत्तरतः पूर्वायामञ्जलिधारान्दद्यात्‌॥ ततः प्रजापतिऋषिस्त्रिष्टु
प्छन्दः सवितादेवता अग्निपर्युक्षणे विनियोगः॥ ॐ देवसवितुः प्रसुवयज्ञं
प्रसुवयज्ञपतिंभगाय॥ दिव्योगन्धर्वः केतपूः केतन्नः पुनातुवाचस्प

0 centimeters 5 10 15 20

३५.
३१

निर्वीचन्नः स्वदतु· इति होमीय द्रव्य सहीत स्याग्ने र्द्विपरीत नाभिधा
रणावेष्टनं कुर्य्यात्॥ ततो जानूत्थाप्य· समिधमेकां फलपुष्यकुश
सहितां गृहीत्वा· उपरि कृतदक्षिण हस्तो विरूपाक्षं जपेत्॥ परमे
ष्ठी ऋषी र्निगद छन्दः कालाग्नि रुद्र रूपो ग्नि र्देवता विरूपाक्ष
जपे विनियोगः॥ ॐ तपश्च तेजश्च श्रद्धा च ह्रीश्च सत्यं चाक्रोधश्च

एम.

त्यागश्च धृतिश्च धर्म्मश्च· सत्वञ्च वाक् च मनश्चात्मा च· तानि प्रपद्ये·
तानि मामवन्तु· ॐ भूर्भुवः स्वरोँ महान्तमात्मानं प्रपद्ये· विरूपाक्षो
सि दन्तांजिस्तस्य ते· शय्या पर्णो गृहा न्तरिक्षे· विमितं हिरण्मयं· त
द्देवानां हृदयान्ययस्मये· कुम्भे न्तः सन्निहितानि· तानि बलभृ
च्च बलसाच्च रक्षतो प्रमनी ख्रनिमि षतू· तत्सत्यं· यत्ते द्वादश पुत्रा

उप · ल्ले · त्वा सम्वत्सरे · सम्वत्सरे · कामप्रेण यज्ञे यथाजयित्वा पुनर्ब्रह्म
३२ चर्य्यमुपयन्ति त्वं · देवेषु ब्राह्मणोस्यहं · मनुष्येषु ब्राह्मणो वै ब्राह्म
णमुपधावत्युप त्वा धावामि जपन्तं · मा मा प्रतिजापिर्ज्जुह्वन्तं · मा
मा प्रतिहौषीः कुर्वन्तं · मा मा प्रतिकार्षीस्त्वां प्रपद्ये · त्वया प्रसूत ·
इदं कर्म्म करिष्यामि · तन्मे राध्यतां · तन्मे समृध्यतां · तन्म उपपद्य ताम ·

तां · समुद्रो मा विश्वव्यचा · ब्रह्मानुजानातु · तुथो मा विश्ववेदा ब्रह्मणः
पुत्रोनुजानातु · श्वात्रो मा प्रचेता · मैत्रावरुणोनुजानातु · तस्मै विरूपाक्षा
य दन्ताञ्जये समुद्राय विश्वव्यचसे तुथाय · विश्ववेदसे श्वात्राय प्रचे
तसे सहस्राक्षाय · ब्रह्मणः पुत्राय नमः ॥ इति पठित्वा कुशमेशान्यां त्य
क्त्वा · फलपुष्पं ब्रह्मणे निवेद्य · दक्षिणाजानुं पातयित्वा · घृताक्तांस

0 centimeters 5 10 15 20

उप.
३३

मिधं तूष्णीमग्नौ क्षिपेत् ॥ ततस्तस्य संस्कृतस्य समुद्भवस्य नाम्नोग्नेः पश्चात् स्वसन्निधौ दक्षिणो माणवकमुपवेश्य व्याहृतिहोमं कुर्यात् ॥ प्रजापतिऋषिर्गायत्री छन्दोग्निर्देवता व्याहृतिहोमे विनियोगः ॥ ॐ भूः स्वाहा ॥ प्रजापतिऋषिरुष्णिक् छन्दो वायुर्देवता व्याहृतिहोमे विनियोगः ॥ ॐ भुवः स्वाहा ॥ प्रजापतिऋषिरनुष्टुप्छन्दो

राम.

सूर्यो देवता व्याहृतिहोमे विनियोगः ॥ ॐ स्वः स्वाहा ॥ प्रजापतिऋषिर्वृहती छन्दो वृहस्पतिर्देवता महाव्याहृतिहोमे विनियोगः ॥ ॐ भूर्भुवः स्वः स्वाहा ॥ ततः पञ्चभिर्मन्त्रैः पञ्चाहुतीर्जुहुयात् ॥ माणवकाचार्य्यः ॥ प्रजापतिऋषिरग्निर्देवता उपनयनहोमे विनियोगः ॥ ॐ अग्ने व्रतपते व्रतञ्चरिष्यामि तत्ते प्रब्रवीमि तच्छकेयं ॥ तेनर्ध्यासमि

उप· दमहमनृतात्सत्यमुपेमि स्वाहा॥ प्रजापतिऋषिर्वायुर्द्देवता उप
३४ नयनहोमेविनियोगः॥ ॐ वायोव्रतपतेव्रतञ्चरिष्यामि· तन्मेप्रव्र
वीमि तच्छकेयं॥ तेनर्द्ध्यासमिदमहमनृतात्सत्यमुपेमि स्वाहा॥
प्रजापतिऋषिः सूर्य्यो देवता उपनयनहोमे विनियोगः॥ ॐ सूर्य्य राम·
व्रतपतेव्रतञ्चरिष्यामि· तन्मेप्रव्रवीमि तच्छकेयं॥ तेनर्द्ध्यासमिद

महमनृतात्सत्यमुपैमि स्वाहा॥ प्रजापतिऋषिश्चन्द्रो देवता उपन
यनहोमेविनियोगः॥ ॐ चन्द्र व्रतपतेव्रतञ्चरिष्यामि· तन्मे प्रव्रवीमि
तच्छकेयं॥ तेनर्द्ध्यासमिदमहमनृतात्सत्यमुपैमि स्वाहा॥ प्रजाप
तिऋषिरिन्द्रो देवता उपनयनहोमे विनियोगः॥ ॐ व्रतानांव्रतपते
व्रतंचरिष्यामि· तन्मे प्रव्रवीमि तच्छकेयं॥ तेनर्द्ध्यासमिदमहमनृ

0 centimeters 5 10 15 20

उप.
३५

तात्सत्यमुपैमि स्वाहा ॥ एवं होमं कृत्वा आचार्य्यः पश्चादग्नेरुत्तरा
ग्रेषु कुशेषु पूर्व्वाभिमुखः ऊर्द्ध्वस्थितो भवेत् । ततो ऽप्याचार्य्यसम्मु
खे माणवक आचार्य्याञ्चलेन परिकृताञ्जलिराचार्य्याभिमुखो मा
णवक उत्तराग्रेषु कुशेषु तथैव तिष्ठेत् । अथान्यो मन्त्रवान् ब्राह्मण
स्तस्य दक्षिणतो वस्थाय माणवकस्याञ्जलिमुदकेना पूर्य्य पश्चा

राम

दाचार्य्यस्यापि पूरयेत् ॥ ततो माणवकं प्रेक्षमाण आचार्य्यो जपेदिति
मन्त्रं ॥ प्रजापतिरृषिरनुष्टुप्छन्दो अग्निर्वायुः सूर्य्यश्चन्द्रो देवता उप
नयने मानवकं प्रेक्षमाणस्याचार्य्यस्य जपे विनियोगः ॥ ॐ आगन्त्रा
समगन्महि पशु मर्त्यं युयोतन । अरिष्टाः सञ्चरेमहि स्वस्ति चरताद
यं ॥ ततो मानवकस्य हस्तं नीत्वा आचार्य्यो जपत्यमुं मन्त्रं ॥ प्रजाप



उप·
२६

तिऋषिः सवितादयो देवता· गृहीतमाणवकहस्तस्याचार्य्यस्य
जपे विनियोगः ॥ अग्निष्टे हस्तमग्रहीत्सविता हस्तमग्रहीदर्य्यमा
हस्तमग्रहीन्मित्रस्त्वमसि· कर्म्मणाग्निराचार्य्यस्तव ॥ अथाचा
चार्य्यो मानवकं यजुरिदं पाठयेत् ॥ प्रजापतिऋषिराचार्य्यो देव
ता· उपनयने मानवकवाचने विनियोगः ॥ ॐ ब्रह्मचर्य्यमागामु

रम·



पमानयस्व· इत्यपिधाय ॥ अथमानवकस्य देवताश्रयं नामधेयंप
रिकल्प्याचार्य्यो मानवकमिदं पृच्छेत् ॥ प्रजापतिऋषिर्म्माणव
को देवता· उपनयने माणवकस्य नामप्रश्ने विनियोगः ॥ ॐ कोना
मासि· ततो माणवको ऽसौ· स्वकीयं कल्पितं नाम उचार्य्य· आचा
र्य्यो य उत्तरं दद्यात् ॥ प्रजापतिऋषिर्म्माणवको देवता· उपनयनेमा

0 centimeters 5 10 15 20 25

उप.
२

नवकनामकथने विनियोगः॥ ॐ विष्णुशर्म्मनामास्मि॥ ॥अपोदकाञ्जलिमुत्सृज्य आचार्य्यो दक्षिणेन पाणिना· मानवकस्य दक्षिणपाणिं साङ्गुष्ठमुत्तानं गृह्णात्यनेन॥ मन्त्रे चासौ शब्दस्थाने सम्बोधनेन नाम प्रयोक्तव्यं॥ प्रजापतिरृषिः सविताश्विपूषणो देवता· उपनयने मानवकहस्तग्रहणे विनियोगः॥ ॐ देवस्य ते सवितुः प्र

राम·

सवेश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यां हस्तं गृह्णामि· श्रीविष्णुशर्म्मन्॥ ततो मानवकस्य हस्तं गृहीत्वा जपेत्॥ प्रजापतिरृषिः सविता दपो देवता गृहीतमाणवकहस्ताचार्य्यजपे विनियोगः॥ ॐ अग्निस्ते हस्तमग्रहीदर्य्यमा हस्तमग्रहान्मित्रस्त्वमसि कर्म्मणाग्निराचार्य्यस्तव॥ अथैतदेशास्यमेव माणवकं· अग्निं प्रदक्षिणमावर्त्तयेदनेन॥ प्रजापतिरृषि

0 centimeters 5 10 15 20

उप· रनुष्टुप्छन्दः सूर्य्यो देवता उपनयने मानवकमावर्त्तने विनियोगः ॥८
३८ ॐ सूर्य्यस्यावृतमन्वावर्त्तस्व श्रीविष्णुशर्म्मन् ॥ ततो दक्षिणेन पाणि
ना · मानवकस्य दक्षिणमंशमनुस्पृश्यानन्तर्हितां · नाभिमनुस्पृ
शेदनेन ॥ अमुं पदस्थाने द्वितियान्तं नामप्रयोक्तव्यं ॥ प्रजापतिऋ
षिरनुष्टुप्छन्दो · नाभ्यन्तकौ देवते उपनयने ब्रह्मचारिनाभिस्प राम·

र्शने विनियोगः ॥ ॐ प्राणानां ग्रन्थिरसि · मा विस्रसोन्तक इदन्ते परि
ददामि · श्रीविष्णुशर्म्माणं ॥ ततो नाभिदेशोपरि देशमभिस्पृशेदनेन ॥
प्रजापतिऋषिर्वायुर्देवता उपनयने · ब्रह्मचारिनाभिदेशोपरिदेशस्प
र्शने विनियोगः ॥ ॐ अकुर इदन्ते परिददामि · श्रीविष्णुशर्म्माणं ॥ त
तो मानवकस्य हृदयं स्पृशेदनेन ॥ प्रजापतिऋषिः कृशानुर्देवता · उप

उप·
३९

नयने ब्रह्मचारि हृदयस्पर्शने विनियोगः॥ ॐ कृशान इदं ते परिददा
मि· श्री विष्णुशर्म्मणं॥ ततो दक्षिणेन पानिना माणवकस्य दक्षि
णं समालभ्य जपेत्॥ प्रजापतिर्ऋषिः प्रजापतिर्द्देवता उपनयने ब्र
ह्मचारि दक्षिणांसस्पर्शने विनियोगः॥ ॐ प्रजापतेत्वा परिददामि·
श्री विष्णुशर्म्मणं॥ ततो वामेण पाणिना· वामांसस्पृष्ट्वा जपेत्॥

राम·

प्रजापतिर्ऋषिः सविता देवता उपनयने ब्रह्मचारि सर्व्वाङ्गसस्पर्शने वि
नियोगः॥ ॐ देवाय त्वा सवित्रे परिददामि· श्री विष्णुशर्म्मणं॥ अथैनं
बोधयति॥ प्रजापतिर्ऋषिर्ब्रह्मचारि देवता उपनयने ब्रह्मचारि सं
बोधने विनियोगः॥ ॐ ब्रह्मचार्य्यसि· विष्णुशर्म्मणं॥ अथैनं प्रेषं का
रयति॥ प्रजापतिर्ऋषिर्ब्रह्मचारि देवता उपनयने ब्रह्मचारि प्रेष्यने

0 centimeters 5 10 15 20

उप·
४०

विनियोगः॥ ॐ समिधमाधेहि· ॐ आपोअशान· ॐ कर्म्मकुरु·
ॐ मादिवास्वाप्सीः प्रतिप्रश्नं च ब्रह्मचारिणा ॐ इति वक्तव्यं॥ ततः आ
चार्य्यः अग्नेरुत्तरतः प्राङ्मुख उदगग्रेषु कुशेषुउपविशेत्॥ मान
वकश्च प्रत्यङ्मुखो भूत्वा· भूगतदक्षिणजानुराचार्य्याभिमुखस्त
थैव उदगग्रेषु कुशेषुउपविशेत्॥ अथैनं मानवक·माचार्य्यस्त्रिए

राम·

वृत्तां· मेखलां कृत्वा· यथाप्रवरग्रन्थिं युतां· प्रदक्षिणं परिधापयन्
मन्त्रञ्च पाठयेत्॥ प्रजापतिऋषिस्त्रिष्टुप्छन्दो मेखला देवता उप
नयने माणवकमेखलापरिधापने विनियोगः॥ ॐ इयं दुरुक्तात्प
रिबाधमाना वर्णं पवित्रं पुनती म आगात्॥ प्राणापानाभ्यां बलमाव
हन्ती· स्वसादेवी सुभगा मेखलेयं॥ ॐ ऋतस्य गोप्त्री तपसः परस्वी·



उप·
४१

घ्नती रक्षः सहमाना अरातीः ।। सा मा समन्त मभि पर्य्येहि भद्रे भ-
र्त्तारस्ते मेखले मा रिषाम ।। ततः आचारात् कौपीनं परिधापये-
त् ।। स च पूग यज्ञोपवीतभाराडाय तन्तर्यै· ब्राह्मणेभ्यः प्रत्येकं मा-
नवको दद्यात् ।। ततो यज्ञोपवीतं परिधापयन् पाठयेत् ।। ब्रह्म-
चारी पठनीयो मन्त्रः ।। प्रजापतिर्ऋषिर्गायत्री छन्दो विश्वेदेवा

एम·



देवता उपनयने यज्ञोपवीतपरिधाने विनियोगः ।। ॐ यज्ञोपवीत-
मसि यज्ञस्य त्वोपवीतेनोपनह्यामि ।। ततः ऐणेयमजिनं परि-
धापयन्· पाठयेत् ।। प्रजापतिर्ऋषिः शाक्वरी छन्दोऽजिनं देवता उ-
पनयनेऽजिनं परिधापने विनियोगः ।। ॐ मित्रस्य चक्षुर्द्धरुणं
बलीयस्तेजो यशस्वि स्थविरं समिद्धं ।। अनाहनस्यं वसनं जरिष्णु

0 centimeters 5 10 15 20 25



उप.
४२

पवीतं दत्वा ह्यजिनं दद्येत्॥ ततो माणवक आचार्यस्य समीपं गछे
देवं कृत्वा राणाः॥ ॐ अधीहि भोः सावित्रीं मे भवाननुब्रवीतु। आचार्यस्
तस्मै माणवकाय आसनार्थमुपसन्नाय समीक्षणाय स्वयमपि स
मीक्षिताय सावित्रीमनुब्रूयात्। पाकपादशः॥ ततोऽर्धर्चशः ततः कृत्स्नां
सावित्रीमध्यापयेत्॥ माणवकोपि तथैवाधीयात्॥ ॥तत्र

राम:



माणवकस्य दक्षिणकर्णे। सावित्र्याः विश्वामित्र ऋषिर्गायत्री छन्दः
सविता देवता उपनयने सावित्रीदाने विनियोगः॥ ॐ तत्सवितुर्वरेण्यं
भर्गो देवस्य धीमहि॥ धियो यो नः प्रचोदयात्॥ इति प्रथमावृत्तौ क्र
मः॥ द्वितीयायां। तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहिः धियो यो
न प्रचोदयात्॥ तृतीयायां। तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहिः

15
10
5
0 centimeters 5
10
15
20
25

उप·
४३

धियो यो नः प्रचोदयात् ॥ अत्र तु सह पाठो विशेषः ॥ ततः ॐ महाव्या
हृतीनां ॥ प्रजापतिर्ऋषिर्गायत्र्युष्णिगनुष्टुप्छन्दांस्यग्निर्वायुसूर्य्या
देवता उपनयने व्याहृतिदाने विनियोगः ॥ ॐ भूरोँ ॐ भुवरोँ ॐ स्व
रोँ· इति ॐकाराण्ड स्यात् ॥ अथर्ऋजुं केशान्तिकमनग्निदूषितम
व्रणं पालाशं दण्डं प्रयच्छेत्ः मानवकं वाचयति ॥ प्रजापतिर्ऋषिः पं

राम·

क्तिश्छन्दो दण्डाग्निदेवता उपनयने दण्डार्प्पणे विनियोगः ॥ ॐ
सुश्रवः सुश्रवसं मा कुरु· यथा त्वमग्ने सुश्रवः सुश्रवा देवेष्वेवमहं सु
श्रवः सुश्रवा ब्राह्मणेषु भूयासं ॥ अथ मानवको· भैक्षं चरेत् ॥ प्रथ
मं मातरमेव· भिक्षां याचेत् ॥ ॐ भवति भिक्षाम्मे देहि· अनेन म
न्त्रेण याचेत्· माणवकः प्रथमभैक्षमाचार्य्याय समर्प्पयेत् ॥ तदन

उप.
४४

न्तरमन्यामपि यथासत्रवं याचेत्॥ आचारात् ॐ भवन्भिक्षां मे
देहि· इति पुरुषमपि याचेत्॥ अथ यदि समिदाधानं· तस्मिन्नेव
क्षणे क्रियते॥ अथ यदि दिनान्तरे समावर्त्तनं क्रियते· तदा व्याहृति
होमादिवामदेवगानांतरं तन्त्रं समाप्य तदा नैवाग्नावाचारात् कर्त्त
व्यं॥ अथ सायंसंध्यामुपास्यास्तङ्गते सवितरि क्रियते· तदा अनन्त

राम.

रोक्तां· कुशण्डिकामनुसंधाय· व्याहृतिहोमं च कृत्वा अग्नेन्तरे समि
दाधानं प्रयोगः कर्त्तव्यं॥ तत्क्रमः॥ माणवकः स्वप्रादेशमितसमिध
त्रयं वक्ष्यमाणविधिना जुहुयात्॥ एकां प्रथमतस्तूष्णीं द्वितीया
मादाय॥ प्रजापतिऋषिरग्निर्देवता अग्नौ समिदाधाने विनियो
गः॥ ॐ अग्नये समिधमाहार्षं· बृहते जातवेदसे॥ यथात्वमग्ने स

उप·
४५

मिधा समिद्धसेवमहमायुषा मेधया वर्च्चसा प्रजया पशुभिर्ब्र
ह्मवर्च्चसेन धनेनान्नाद्येन समेधिषीय स्वाहा॥इतिजुहुयात्॥
॥अपरां समिधमात्रां प्रक्षिपेत्॥ ॥ततआचार्य्यो व्याहृ
तिहोमं कुर्य्यात्॥प्रजापतिऋषिर्गायत्री छन्दोग्निर्द्देवता·व्याहृ
तिहोमेविनियोगः॥ॐ भूः स्वाहा॥प्रजापतिऋषिरुष्णिक छन्दोवा

एम·

युर्द्देवताव्याहृतिहोमेविनियोगः॥ॐ भुवः स्वाहा॥प्रजापतिऋषिरनुष्टु
प्छन्दः सूर्य्यो देवताव्याहृतिहोमेविनियोगः॥ॐ स्वः स्वाहा॥प्रजापतिऋ
षिर्बृहती छन्दो बृहस्पतिर्द्देवता·महाव्याहृतिहोमेविनियोगः॥ॐ भूर्भु
वः स्वः स्वाहा॥अधुना प्रादेशाद्यायन होमः क्रियते·तदा पद्धतिरोषेग्र
न्थेषु स्पष्टः॥ततः प्रादेशमितां समिधं घृताक्तां तूष्णीमग्नौ क्षिपेत्॥त

0 centimeters 5 10 15 20

उप.
४६

तः पुनर्भूगतदक्षिणजानुः उदकस्थालीमग्नेः कृत्वा अग्निः पर्युक्ष
णादि कुर्य्यात् ॥ प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः सविता देवता अग्नि
पर्युक्षणे विनियोगः ॥ ॐ देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिम्भ
गाय· दिव्यो गन्धर्वः केतपूः केतन्नः पुनातु वाचस्पतिर्वाचन्नः स्वद
तु ॥ इति होमीयद्रव्यसहितस्याग्नेर्विपरीतवारिधारया वेष्टनं ॥

एम.

ततः प्रजापतिर्ऋषिरदितिर्देवतोदकाञ्जलिप्रसेचने विनियोगः
ॐ अदितेऽनुमन्यस्वः इत्यग्नेर्दक्षिणतः पूर्व्वाग्रां ॥ प्रजापतिर्ऋषिरनुमति
र्देवतोदकाञ्जलिप्रसेचने विनियोगः ॥ ॐ अनुमतेऽनुमन्यस्वः इति प
श्चादुत्तराग्रां ॥ प्रजापतिर्ऋषिः सरस्वती देवतोदकाञ्जलिप्रसेचने वि
नियोगः ॥ ॐ सरस्वत्यनुमन्यस्वः इत्युत्तरतः पूर्व्वाग्रां ॥ पूर्व्वविपरीतमञ्ज

15
10
5

0 centimeters 5 10 15 20

उप·
४

लिधारां दद्यात्॥ ततस्तरणाक्रमेण वर्हिर्हत्वा प्पजुटिकामवद्ध्वा
महस्ते कृत्वा॥ प्रजापतिऋषिर्बयो देवता दर्भतृणाभ्यञ्जने विनियो
गः॥ ॐ अक्तुं विहाणा व्यन्तु वयः इति मूलमध्याग्रक्रमेण घृताक्तां
कृत्वा॰ जलेनाभ्युक्ष्याग्नौ क्षिपेदनेन॥ प्रजापतिऋषिरनुष्टुप्छन्दो राम·
रुद्रो देवता दर्भजुटिकाहोमे विनियोगः॥ ॐ यः पशूनामधिपती रु

द्रस्तन्तिचरो वृषा॥ पशूनस्माकं मा हिंसीरेतदस्तु हुतन्तव स्वाहा॥
तत उत्थाय ब्रह्मचारिदक्षिणहस्तस्थस्रुवेण घृतपुष्पफलपू
र्णेन॰ पूर्णांहुतिं दद्यात्॥ प्रजापतिऋषिर्विराट्छन्दः इन्द्रो देवता
यशस्कामस्य यजनीयप्रयोगे विनियोगः॥ ॐ पूर्णाहोमं यशसे जुहो
मि यो स्मै जुहोति वरमस्मै ददाति॥ वरं वृणो यशसा भामि लोके स्वा

उप
४८

हा· ततः ॐ वसुभ्यस्वाहेत्यविछिन्नामाज्यधारां दद्यात्॥ ॥ततो ब्र
ह्मदक्षिणा॥ कुशत्रयाक्षतजलान्यादाय॥ ॐ अद्य कृतैतदुपनयन
होमकर्म्मणि कृताकृतावेक्षणरूपब्रह्मकर्म्मप्रतिष्ठार्थमिदं पू
र्णपात्रं प्रजापतिदैवतं ब्रह्मणे दक्षिणां नमः॥ ॥ततोग्निप्रद एम·
क्षिणाक्रमेण हस्तं धौत्वा· ब्रह्मणोत्थापनं· ग्रन्थिविमोकोवा॥ त

तः स्रुवेण भस्मानीय त्र्यायुषकरणं॥ ॐ त्र्यायुषं जमदग्नेरिति हृ
दि॥ ॐ कश्यपस्य त्र्यायुषमिति दक्षिणबाहुमूले॥ ॐ अगस्त्यस्य
त्र्यायुषमिति ~~शिरसि~~ वामबाहुमूले॥ ॐ यद्देवानां त्र्यायुषमिति
कण्ठे॥ ॐ तन्नो अस्तु त्र्यायुषमिति शिरसि· बिन्दुं कुर्य्यात्॥ माण
वकपक्षे· तन्नो इत्यस्य स्थाने तत्ते इति विशेषः॥ ततो पात्रस्थजलमप

उप· नीयान्यजलेनापूर्य्य· तत्र कुसुमं प्रक्षिप्य॥ दक्षिणादानं॥ कुश
४९ त्रयाक्षतजलान्यादाय॥ ॐ अद्य कृतैतदुपनयनहोमकर्म्मप्रति
ष्ठार्थं· गामेकां रुद्रदैवतां यथानामगोत्राय ब्राह्मणाय दक्षिणां दा णा
तुमहं समुत्सृज्ये॥ आचारात् यथाशक्ति स्ववर्णं वा॥ ततः पूर्ववद्वा
मदेव्यगानं॥ उपनीतः बाहोरात्रत्रयमक्षारलवणान्न भुञ्जीत॥ णम·
॥ इत्युपनयनकर्म्म समाप्तं शुभमस्तु॥

अथ छन्दोगानां वेदारम्भ॥ ॥ ततः आचार्य्यो मातृकापूजाभ्यु
दयिके कृत्वा· पुरस्तात् वहिःशालायां प्राङ्मुख उपविष्टः कुशैर्ह
स्तमात्रं भूमि परिसमुह्य· तां कुशांईशान्यां परित्यज्य· गोमयोद
केनोपलिप्य· अग्निस्थापनपर्य्यन्तं वामहस्ते

वे·दा·
५०

अथ छन्दोगानां वेदारम्भ॥ ॥ततः आचार्य्यो मातृकापूजा
भ्युदयिके कृत्वा· पुरस्तात्· बहिः शालायां प्राङ्मुखउपविष्टः गोम
योपलिप्तदेशे· कुशण्डिकां कुर्य्यात्· तत्र क्रमः॥ अभ्युक्षणा
दि कर्म्म कर्तुं· कुशप्रच्छादितमुदितमुदकमानेतव्यं· कुशैर्हस्त
मात्रं पूर्व्वोत्तरप्लवं समन्ताद्देशे परिसमुह्य· गोमयोदकेनोपलि एम·

प्य· अग्निस्थापनपर्य्यन्तं वामहस्तं भूमावारोप्य· दक्षिणं जानुं भू
मौ एव पातयित्वा· फलपुष्पकुशानामन्यतमं गृहीत्वा· रेखापञ्च
कं कुर्य्यात्॥ तत्र प्रथमं पूर्व्वांयां· द्वादशाङ्गुलप्रमाणा· पृथिवीदेव
ताका ध्येया· पीतवर्णा लेखा लिखितव्या॥ तल्लेखा पश्चिमभागतं
लग्ना· एकविंशत्यङ्गुलप्रमाणा· अग्निदेवताका ध्येया· लोहितवर्णा
उत्तरगा

वे·दा· लेखा लिखितव्या ॥ तल्लेखासंलग्ना पूर्वाग्रलेखातः षडङ्गुलान्त
५१ राला पूर्वगामिनी प्रादेशप्रमाणा· प्रजापतिदेवताका ध्येय· कृ
ष्णवर्णा लेखा लिखितव्या ॥ तस्या अपि षडङ्गुलान्तराला· पूर्व
गामिनी प्रादेशप्रमाणा· रुद्रदेवताका ध्येय· नीलवर्णा लेखा लि
खितव्या ॥ तस्या अपि षडङ्गुलान्तराला पूर्वगामिनी· द्वादशाङ्गुल राम·

प्रमाणा· सोमदेवताका ध्येय· शुक्लवर्णा लेखा लिखितव्या ॥ एवं
लेखापञ्चकं कृत्वा ॥ अनामिकाङ्गुष्ठाभ्यां· ताभ्य एव मृदः खनि
त्वा· ऐशान्यामरत्निमात्रे देशे क्षिपेत् ॥ ततो जलेन लेखाभ्युक्ष
णं कृत्वा ॥ ततः सन्निधापितकांस्यभाजनस्थेग्नौ· ज्वलत्तृणं नि
रस्यत्नेन ॥ प्रजापतिऋषिस्त्रिष्टुप्छन्दो अग्निर्देवता अग्निसं

0 centimeters 5 10 15 20


centimeters
5
10
15
20

वेदा
५२

स्फोटे विनियोगः ॥ ॐ क्रव्यादमग्निं प्रहिणोमि दूरं यमराज्यंरि
प्रवाहः ॥ ततोऽग्निं प्रणयेदनेन ॥ प्रजापतिऋषिर्बृहती छन्दो बृ
हस्पतिर्देवताऽग्निस्थापने विनियोगः ॥ ॐ भूर्भुवः स्वः इति मु
खमग्निं प्रणयेत् ॥ ततो वामहस्तं जानुचोत्थाप्य ॥ अञ्जलिं ब
द्ध्वा ॥ ॐ इहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन् इ

राम

त्यग्नेरूपस्थानं ॥ ततः पातितदक्षिणजानुः प्रादेशमितां समिधं
घृताक्तां तूष्णीमग्नौ क्षिपेत् ॥ ततो ब्रह्मवरणं ॥ ॐ अद्य कर्त्तव्य
वेदारम्भहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मकर्त्तुं॰
त्वं मे ब्रह्मा भव ॥ इति ब्रह्माणं वृणुयात् ॥ ततोग्रणाग्निं परिक्रम्या॰
ग्नेर्दक्षिणत ऊ ऊर्द्ध्वजानुः प्रत्यङ्मुखउपविष्ठेन ब्रह्मासनैं प्राङ्मुखी स्थापिर
ने

वेदा·
५३

धांरान्दत्वा· तस्याउपरि प्रागग्रान्कुशानास्तीर्य्य· प्रत्यङ्मुखस्तिष्ठ
न्· वामहस्तानामिकाङ्गुष्ठाभ्यां· ब्रह्मासनादर्भमेकं गृहीत्वा नैऋत्यां
क्षिपेदनेन॥ प्रजापतिऋषिर्गायत्रीछन्दोऽग्निर्देवता· ब्रह्मासनात्तृ
णानिरसने विनियोगः॥ ॐ निरस्तः परावसुः इति तृणान्निरस्य॥
ततः उदकमुपस्पृश्य·॥ ब्रह्माणमुपवेशयेदनेन॥ प्रजापतिऋ

राम·

षिस्त्रिष्टुप्छन्दोऽग्निर्देवता ब्रह्मस्थापने विनियोगः॥ ॐ आवसोः सद
ने सीद· इति छन्दाद्यस्यतमं ब्रह्माणमुपवेशयेत्॥ ततो ब्रह्मोपरि प्राग
ग्रकुशानास्तीर्य्य· जलेनाभ्युक्ष्य· ब्रह्मानं स्पृष्ट्वा जपेत्॥ प्रजापति
ऋषिर्गायत्रीछन्दो विष्णुर्देवता जपे विनियोगः॥ ॐ इदं विष्णुर्वि
चक्रमे त्रेधा निदधे पदं॥ समूढमस्य पांसुले॥ इति जप्त्वा तेनैव पथा

15 10 5

0 centimeters 5 10 15 20

वेदा· परावृत्य स्वस्यासनं गच्छेत्॥ ब्राह्मणपक्षे तु वरणप्रतिवचनादिकस्त्र
५४ क्षमं॥ ततउपविश्य॥ दक्षिणजानुं पातयित्वा· उपरिकृतदक्षिण
हस्तः करद्वयमधोमुखं भूमावारोप्य भूमिजपं कुर्यात्॥ परमेष्ठी
ऋषिरनुष्टुप् छन्दोग्निर्देवता भूमिजपे विनियोगः॥ ॐ इदं भूमेर्भ
जामह इदं भद्रं सुमङ्गलं॥ परासपत्नान्बाधस्वान्येषां विन्दते धनं॥ राम·

णौवस्त्रशब्दप्रयोगः॥ ततो जानू स्थाप्य· दक्षिणहस्तेन कुशत्रयं गृ
हीत्वा· अग्नेरुत्तरादितः प्रदक्षिणक्रमेण प्रतिक्रमं परिसमूहये
त्॥ कौत्सऋषिर्जगती छन्दोग्निर्देवता पृष्ठस्य षडहस्य षष्ठेग्रहस्य
ग्निमारुते शस्त्रे परिसमूहने विनियोगः॥ ॐ इमं स्तोममर्हते जातवेद
से रथमिव सम्महेमा मनीषया॥ भद्रा हि नः प्रमतिरस्य संसद्यग्ने स



वेदा·
५५

ख्येमारिषामावयन्तव·इत्यग्नेरुत्तरतः॥ ॐ भरामेध्मं कृणवामाहवीं
षि ते चितयन्तः पर्वणापर्वणा वयं॥ जीवातवे प्रतरां साधया धियोग्ने
सख्येमारिषा मावयन्तव·इति पूर्वतः॥ शकेम त्वा समिधं साधया धि
येत्वे देवा हविरदन्त्याहुतं॥ त्वमादित्यां आवह तांह्युस्मस्यग्ने सख्ये
मारिषामावयन्तव·इति दक्षिणतः॥ परिसमूह्य·बर्हिभिरग्नेर्मूलान्या एम·



च्छादयन्·त्रिरावृत्तं पश्चावृत्तं वा·पुरस्ताद्दक्षिणतः·उत्तरतः पश्चात्स्तरणं
कुर्यात्॥ ततः पूर्वोक्तात् खादिरादिन विंशति ध्मात् मूलमध्याग्रक्रमे
ण·घृताक्तान्·प्रादेशद्वय परिमितान्·प्रजापतिं मनसा ध्यात्वा·तूष्णीम
ग्नौ जुहुयात्॥ ततस्तेनादेव बर्हिषः साग्रकुशपत्रद्वयं गृहीत्वा·प्रादेश
मात्रं कृत्वा·कुशमन्तर्धाय छिंद्यादनेन॥ प्रजापतिऋषिः पवित्रे देवते·


0 centimeters 5
10
15
20

वेदा·
५६

पवित्रच्छेदने विनियोगः ॥ ॐ पवित्रे स्थो वैष्णव्यौ · ततोद्भिरुन्मृज्यादनेन
॥ प्रजापतिरृषिः पवित्रे देवते पवित्रसंमार्जने विनियोगः ॥ ॐ वि
ष्णोर्मनसा पूते स्थः ॥ इति संमृज्याज्यस्थाल्यामुदगग्रे पवित्रे निधा
याज्यमावपेत् ॥ ततो व्यस्तहस्ताङ्गुष्ठोपकनिष्ठाभ्यां · गृहीतपवित्रा
भ्यामाज्यमूर्द्ध्वं नीत्वा · सकृदुत्क्षिपेदनेन ॥ प्रजापतिरृषिराज्यं दे

राम·

वता · आज्योत्पवने विनियोगः ॥ ॐ देवस्त्वा सवितोत्पुनात्वच्छिद्रेण प
वित्रेण वसोः सूर्यस्य रश्मिभिः स्वाहा · ततोद्भि तूष्णीं क्षिपेत् · ततः पवि
त्रे जलेनाभ्युक्ष्य · तूष्णीमग्नौ क्षिपेत् ॥ ततः आज्यपात्रमुदकेनाभ्युक्ष्
याग्नेरुपरि निधायाग्नेरुत्तरतो वाज्यमवतारयेत् · इत्याज्यसंस्का
रः ॥ ॥ एवं स्रुवसंस्कारोपि ॥ ॥ ततो भूगतदक्षिणजानुः उदक



वेदा·
५७

स्थालिमग्नेकृत्य॥ अग्निः पर्युक्षणं कुर्य्यात्॥ प्रजापतिऋषिरदि
तिर्द्देवतोदकाञ्जलिप्रसेचने विनियोगः॥ ॐ अदितेऽनुमन्यस्व·
इत्यग्नेर्दक्षिणतः पूर्व्वायां॥ प्रजापतिऋषिरनुमतिर्द्देवतोदकाञ्ज
लिप्रसेचने विनियोगः॥ ॐ अनुमतेऽनुमन्यस्व· इत्यग्नेः पश्चाद
न्तरायां॥ प्रजापतिऋषिः सरस्वतीदेवतोदकाञ्जलिप्रसेचने विनि

राम·

योगः॥ ॐ सरस्वत्यनुमन्यस्व· इत्यग्नेरुत्तरतः पूर्व्वायामञ्जलिधारान्द
द्यात्॥ ततः प्रजापतिऋषिस्त्रिष्टुप्छन्दः सवितादेवताग्निपर्यु
क्षणे विनियोगः॥ ॐ देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय
॥ दिव्यो गन्धर्व्वः केतपूः केतन्नः पुनातु· वाचस्पतिर्व्वाचन्नः स्वदतु· इति
होमीयद्रव्यसहितस्याग्नेर्व्विपरीतवारिधारयावेष्टनं कुर्य्यात्॥ ततो

वेदा·
५८

जानुत्थाप्य· समिधमेकां फलपुष्पकुशसहितां गृहीत्वा· उपरिकृ
तदक्षिणहस्तो विरूपाक्षं जपेत्॥ परमेष्ठी ऋषिर्निगदछन्दः का
लाग्निरुद्ररूपोग्निर्देवता विरूपाक्षजपे विनियोगः॥ ॐ तपश्च तेज
श्च श्रद्धा च ह्रीश्च सत्यं चाक्रोधश्च त्यागश्च धृतिश्च धर्मश्च· सत्वं च
वाक्च मनश्चात्मा च· तानि प्रपद्ये· तानि मामवन्तु· ॐ भूर्भुवः स्वरों·

एम·

महान्तमात्मानं प्रपद्ये· विरूपाक्षोसि दन्तांजिस्तस्य ते· शय्या पर्णे
गृहान्तरिक्षे· विमितं हिरण्मयं· तद्देवानां हृदयान्ययस्मये· कुम्भे
अन्तः सन्निहितानि· तानि बलभृच्च बलसाच्च रक्षतोप्रमनी अनि
मिषतः तत्सत्यं· यत्ते द्वादशपुत्रास्ते· त्वा संवत्सरे· संवत्सरे काम
प्रेण यज्ञेन याजयित्वा· पुनर्ब्रह्मचर्यमुपयन्ति त्वं· देवेषु ब्राह्म

वेदा·
५९

रू

णोस्म्यहं·मनुष्योऽहं ब्राह्मणो वै·ब्राह्मणमुपधावतूपत्वाधावामिज
पन्तं·मामाप्रतिजापीर्जु[illegible]न्तं·मामाप्रतिहोषिः कुर्वन्तं·मामाप्रति
कार्षिस्त्वां प्रपद्ये·त्वया प्रसूत·इदं कर्म करिष्यामि·तन्मे राध्य
तां·तन्मे उपपद्यतां·समुद्रो मा विश्वव्यचा·ब्रह्मानुजानातु·तुथो
मा विश्ववेदा ब्रह्मणः पुत्रो नुजानातु·श्वात्रो मा प्रचेता·मैत्रावरुणो
तन्मे समृध्यतां·

एम·

नुजानातु·तस्मै विरूपाक्षाय दन्ताञ्जये समुद्राय विश्वव्यचसे तु
थाय·विश्ववेदसे श्वात्राय प्रचेतसे सहस्राक्षाय·ब्रह्मणः पुत्राय न
मः॥इति पठित्वा कुशमैशान्यां त्यक्त्वा·फलपुष्पं ब्रह्मणो निवेद्य·
दक्षिणजानुं पातयित्वा· घृताक्तां समिधं तूष्णीमग्नौ क्षिपेत्॥
स्वदक्षिणे माणवकमुपवेश्य·व्याहृतिहोमं कुर्यात्॥प्रजापतिञ्च

नि

वेदा·
६०

षिर्गायत्री छन्दोग्निर्द्देवता· व्याहृतिहोमे विनियोगः॥ ॐ भूः स्वाहा॥ प्र
जापतिऋषिरुष्णिक्छन्दो वायुर्द्देवता· व्याहृतिहोमे विनियोगः॥ ॐ
भुवः स्वाहा॥ प्रजापतिऋषिरनुष्टुप्छन्दो सूर्य्यो देवता· व्याहृतिहोमे
विनियोगः॥ ॐ स्वः स्वाहा॥ प्रजापतिऋषिर्वृहतीछन्दो वृहस्पतिर्द्देवता·
महाव्याहृतिहोमे वियोगः॥ ॐ भूर्भुवः स्वः स्वाहा॥ ॐ ऋग्वेदाय स्वाहा·

राम·

ॐ पृथिव्यै स्वाहा॥ ॐ अग्नये स्वाहा॥ ॐ ब्रह्मणे स्वाहा॥ ॐ सोमाय
स्वाहा॥ ॐ प्रजापतये स्वाहा॥ ॐ छन्दोभ्यः स्वाहा॥ ॐ देवेभ्यः स्वा
हा॥ ॐ ऋषिभ्यः स्वाहा॥ ॐ श्रद्धायै स्वाहा॥ ॐ मेधायै स्वाहा॥ ॐ
प्रज्ञायै स्वाहा॥ ॐ धारणायै स्वाहा॥ ॐ सदसस्पतये स्वाहा॥ ॐ
अनुमतये स्वाहा॥ ॐ यजुर्वेय स्वाहा॥ ॐ अन्तरिक्षाय स्वाहा॥ ८
दा

वेदा·
६१

ॐ वायवे स्वाहा ॥ ॐ ब्रह्मणे स्वाहा ॥ ॐ सामवेदाय स्वाहा ॥ ॐ दिवे
स्वाहा ॥ ॐ सूर्य्याय स्वाहा ॥ ॐ ब्रह्मणे स्वाहा ॥ ॐ अथर्वणावेदाय स्वा
हा ॥ ॐ दिग्भ्य स्वाहा ॥ ॐ चन्द्रमसे स्वाहा ॥ ॐ विष्णवे स्वाहा ॥ ॐ स
रस्वत्यै स्वाहा ॥ ॐ वरुणाय स्वाहा ॥ ॐ इन्द्राय स्वाहा ॥ ॐ अग्नये
स्विष्टकृते स्वाहा ॥ ॐ भूः स्वाहा ॥ ॐ भुवः स्वाहा ॥ ॐ स्वः स्वाहा ॥ ॐ राम·

भूर्भुवस्वः स्वाहा ॥ इत्याज्याहुतिनन्तर मिषांशके वेदारम्भं गुरुका
रयेत् ॥ ततः आचार्य्येण ॥ ॐ वेदान् अधीहि भो· इति ब्रूयात् ॥ ततो
मानवकेन ॥ ॐ अध्यापयतु मे भवान्· इत्युक्ते ॥ तत्र क्रमस्य दक्षि
णात उपविष्टे उदङ्मुखतिष्ठ समाचान्तं व्यस्त पाणिभ्यां कृताचा
र्य्यप्रणामं· मानवके· आचार्य्येन प्रणवादि प्रणवान्तं सव्याहृति

0 centimeters 5 10 15 20 2


15
10
5
0 centimeters 5
10
15
20

वेदा. कां गायत्रीं मानवकाय पाठयेत् ॥ ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ ज
नः ॐ तपः ॐ सत्यं ॐ तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि धियो यो नः
६२ प्रचोदयात् ॐ ॥ इति सव्याहृतिकां गायत्रीमध्याप्य ॥ ततो वेदानध्य
ध्यापयेत् आचार्यः प्रागग्रेषु कुशेषु आसीनं पवित्रपाणिमुदङ्मु
खं तिष्ठन्नाचार्येन पाठयेत् ॥ ॥ हरिः ॐ ॥ प्रजापतिरृषिर्गाय राम.

त्री छन्दोग्निर्देवता वेदारम्भे विनियोगः ॥ ॐ समिधाग्निं दुवस्यत घृतै
र्बोधयतातिथिं आस्मिन् हव्या जुहोतन ॥ सुसमिधाय शोचिषे घृतं
तीव्रं जुहोतन अग्नये जातवेदसे ॥ ऋग्वेदादिमंत्रस्य मधुच्छन्द ऋ
षिर्गायत्री छंदोग्निर्देवता वेदारम्भे विनियोग ॥ ॐ अग्निमीळे पुरो
हितं यज्ञस्य देवमृत्विजं ॥ होतारं रत्नधातमम् ॥ यजुर्वेदादिमंत्रस्य पर

वेदा· मेष्ठी प्रजापतिऋषि र्यजुःषां छन्दो नाह्लिशाखा वत्सगावो देवता शा
खाछिदने समुन्नयवतूसापाकापाकरणे शाखायागोपस्पर्शने विनि
६३ योगः॥ ॐ इषेत्वोर्जेत्वा वायवस्थ देवो वः सविता प्रार्पयतु श्रेष्ठतमाय
कर्मण आप्यायध्वमघ्न्या इन्द्राय भागं प्रजावतीरनमीवा अयक्ष्मा
मा वस्तेन ईशत माघशंसो ध्रुवा अस्मिन्गोपतौ स्यात बह्वीर्यजमानस्य राम·

पशून्पाहि इषेत्वेति द्विपदस्य अक्षरो मंत्रो दैव्य अनुष्टुप्॥ वसोः पवित्रम्॥
सामवेदादि मंत्रस्य गोतमऋषिर्गायत्री छन्दो ग्निर्देवता वेदारम्भे विनि
योग॥ ॐ अग्न आयाहि वीतये गृणानो हव्यदातये॥ नि होता सत्सि बर्हि
षि॥ अथर्ववेदादि मंत्रस्य दध्यङ्ङाथर्वण ऋषिर्गायत्री छंदः आपो देव
ताः शांति कर्मणि च वेदारम्भे विनियोग॥ ॐ शन्नो देवीरभिष्टय आ

0 centimeters 5 10 15 20

दो

वेदा· यो भवन्तु पीतये ॥ शं योरभिस्त्रवंतु नः ॥ स्वस्ति नइन्द्रो इति वा व्या ॥ इतिया
ठयेत् ॥ ततआचार्य्येन व्याहृतिहोमं कूयते ॥ प्रजापतिऋषिर्गायत्री छन्ग्नि
६४ र्देवता व्याहृतिहोमे विनियोगः ॥ ॐ भूः स्वाहा ॥ प्रजापतिऋषिरुष्णि
क्छन्दो वायुर्द्देवता व्याहृतिहोमे विनियोग ॥ ॐ भुवः स्वाहा ॥ ॐ प्रजा
पतिऋषिरनुष्टुप् छन्द सविता देवता व्याहृतिहोमे विनियोगः ॥ ॐ राम·

स्वः स्वाहा ॥ ॐ प्रजापतिऋषिर्बृहति छन्दो बृहस्पतिर्देवता महाव्या
हृतिहोमे विनियोगः ॥ ॐ भूर्भुवः स्वः स्वाहा ॥ अत्र यदि शान्त्यायनहो
मः क्रियते तदा पद्धतिशेषे अन्वेषव्यं ॥ ततः प्रादेशमितां समिधं घृ
ताक्तां तूष्णी अग्नौ क्षिपेत् ॥ ततो भूगत दक्षिणजानु· उदकस्याली
मग्रे कृत्य· अग्निपर्य्युक्षणादि कुर्य्यादनेन ॥ प्रजापतिऋषिस्त्रि

वेदाः ष्टुप्छन्दःसवीतादेवता अग्निंपर्युक्षणे विनियोगः॥ ॐ देवसवितः
प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय दिव्यो गन्धर्वः केतपूः केतन्नः पुना
६५ तु वाचस्पतिं र्वाचन्नः स्वदतु॥ इति होमीयद्रव्यसहितस्याग्नेः वारिधार
यावेष्टनं कुर्य्यात्॥ प्रजापतिऋषिरदितिछन्दोग्निर्देवता उदकांज
लिप्रसेचने विनियोगः॥ ॐ अदिते अनुमस्याः॥ इत्यग्नेः दक्षिणतपू राम:

र्वाग्रं॥ ॐ प्रजापतिऋर्षिरनुमतिर्देवता उदकांजलि प्रसेचने विनि
योगः॥ ॐ अनुमते अन्व मंस्याः॥ इति पश्चादुत्तराग्रे॥ ॐ प्रजाप
तिऋषिः सरस्वतीदेवता उदकांजलि प्रसेचने विनियोगः॥ ॐ
सरस्वत्यनुमस्याः॥ इत्युत्तरतः पूर्वविपरीतां अंजलिधारां दद्या
त्॥ ततः स्तरणक्रमेण वर्हिःस्थाप्य जूतिकां वध्वा वामहस्ते कृ


15
10
5
0 centimeters 5
10
15
20

वेदा·

६६

त्वा मूलमध्याग्रक्रमेण घृतेनानेनभ्युक्षः ॥ प्रजापतिरृषिर्व
यो देवता दर्भतृणाभ्यंजने विनियोगः ॥ ॐ अक्तं विहारणाव्यं
तु वयः ॥ इति मूलमध्याग्रक्रमेणाजेनाभ्यनक्ति ॥ ततो जलेना
भ्युक्ष्याग्नौ क्षिपेत्· अनेन· प्रजापतिरृषिः त्रिष्टुप्छन्दो रुद्रो दे
वता दर्भजूटिकाहोमे विनियोगः ॥ ॐ यः पशूनामधिपती रुद्रस्तं

राम·

निचेरो वृषापशूनस्माकं माहिंसीरेतदस्तु हुतं तव स्वाहा ॥ ततः उत्था
य ब्रह्मचारिणा करस्पृष्टस्रुवेण फलपुष्पताम्बुलघृतधाराऽवि
छिन्नेन पूर्णाहुतिं जुहूयात्· दनेन ॥ प्रजापतिरृषिर्विराट्छन्द
इन्द्रो देवता यशस्कामेस्य यननीयप्रयोगे विनियोगः ॥ ॐ पूर्णा
होमं यससे जुहोमि योस्मै जुहोति वरमस्मै ददाति वरं वृणे यश·सा

वेदा·

६१

भामिलोके स्वाहा· वसुभ्यः स्वाहा ॥ इति जुहुयात् ॥ ततः उपविश्य स्रुवे
ने भस्मानीय दक्षिणानामीकाग्र गृहीतन भस्मना ॥ ॐ त्र्यायुषं जमद
ग्नेरिति हृदि ॥ ॐ कस्यपस्य त्र्यायुषमिति दक्षिणवाहुमूले ॥ ॐ अ
गस्त्यस्य त्र्यायुषमिति वामवाहुमूले ॥ यद्देवाना त्र्यायुषमिति कण्ठे
॥ तन्नो अस्तु त्र्यायुषमिति शिरसि ॥ अनेनैव क्रमेण व्रह्मचारिणमपि ॥

राम·

तत्र तन्नोऽस्त्यस्य स्थाने· तन्मे इति विशेषः ॥ ततो· ब्रह्मदक्षिणा ॥ ॐ अ
द्यकृतैतद्वेदारम्भहोमकर्मणि कृताकृतावेक्षणरूपब्रह्मकर्मप्र
तिष्ठार्थमिदं पूर्णपात्रं प्रजापतिदैवतं ब्रह्मणो दक्षिणां नमः ॥ ब्राह्म
णपक्षे गोत्रादिकमुच्चार्य्यं ॥ ततोऽग्नि प्रदक्षिणेन· हस्तं नीत्वा ब्रह्मो
त्थापनं· ग्रन्थिविमोचनो वा ॥ ततः पात्रस्य जलमपनीय पात्रं जलान्तो

वेदा.

६८

णपूर्य्ये तत्र कुशुमं क्षिप्य ॥ गोदानं कुर्य्यात् ॥ ॐ अद्य कृतैतत् अमु
ष्यकुमारस्य कर्तव्यवेदारम्भहोमकर्मप्रतिष्ठार्थं गामेकां रुद्रदै
वतां यथानामृगोत्राय ब्राह्मणायाहं ददे ॥ दानप्रतिष्ठां च ददे ॥ य
थाशक्ति सुवर्णं वा ददे ॥ ततो वामदेवगानं ॥ कयानइत्यादि ॥ ॥
इति छन्दोगानां वेदारम्भकर्मसमाप्तम् ॥ ॥ ॥ राम

अथ समावर्त्तनविधिलिख्यते ॥ ॥ समावर्त्तनदिवस एव· प्रथमं सावि
त्रदेवताक· मोदनचरुं कुर्य्यात्· तत्र उदूखलं मुसलं शूर्प्पञ्च प्रक्षा
ल्य ॥ गोमयोपलिप्ते देशे ॥ आचार्य्यः प्राङ्मुख उपविश्य· तत्राभ्युक्ष
णादिकर्म्म कर्त्तुं· कुशप्रच्छादितमुदकमानेतव्यं· कुशोर्हस्तमात्रं प
रिसमुह्य· गोमयोदकेनोपलिप्य· अग्निस्थापनपर्य्यन्तं वामहस्तं भू



समा·

६९

मावारोप्य· दक्षिणजानुं भूमावेव पातयित्वा· फलपुष्पकुशानाम
न्पतमं गृहीत्वा· रेखापञ्चकं कुर्य्यात् ॥ तत्र प्रथमं पूर्व्वाग्रा· द्वादशा
ङ्गुलप्रमाणा· पृथिवीदेवताका ध्येय पीतवर्णा लेखा लिखितव्या·
॥ तल्लेखापश्चिमभागसंलग्ना उत्तराग्रा एकविंशत्यंगुलप्रमाणा
अग्निदेवताका ध्येय लोहितवर्णा लेखा लिखितव्या ॥ तल्लेखासंग्रा राम·



पूर्व्वायलेखात· षडङ्गुलान्तराला पूर्व्वगामिनी प्रादेशप्रमाणा· प्रजाप
तिदेवताका ध्येय· कृष्णवर्णा लेखा लिखितव्या ॥ तस्या अपि षडङ्गुला
न्तराला· पूर्व्वगामिनी प्रादेशप्रमाणा· इन्द्रदेवताका ध्येय· नीलवर्णा
लेखा लिखितव्या· ॥ तस्या अपि षडङ्गुलान्तराला पूर्व्वगामिनी· द्वाद
शाङ्गुलप्रमाणा· सोमदेवताका ध्येय· शुक्लवर्णा लेखा लिखितव्या ॥

15
10
5
0 centimeters 5
10
15
20
25

समा·
७०

एवं लेखापञ्चकं कृत्वा ॥ अनामिकाङ्गुष्ठाभ्यां· ताभ्य एवमृदः ख
नित्वा ऐशान्यामरत्निमात्रे देशे निःक्षिपत् ॥ ततो जलेन लेखाऽ
भ्युक्षणं कृत्वा· सन्निधापितकांस्यभाजनस्थे ग्नौ ज्वलत्तृण
ग्निरस्थापनेनः ॥ प्रजापतिऋषिस्त्रिष्टुप्छन्दोऽग्निर्द्देवता अग्नि
संस्कारे विनियोगः ॥ ॐ क्रव्यादमग्निं प्रहिणोमि दूरं यमराज्यं

एम·

गच्छतु रिप्रवाहः ॥ ततोऽग्निं प्रणयेदनेन ॥ प्रजापतिऋषिर्बृहती
छन्दो बृहस्पतिर्द्देवता अग्निस्थापने विनियोगः ॥ ॐ भूर्भुवः स्वः
इत्यग्निमुखमग्निं प्रणयेत् ॥ ततो वामहस्तं जानुयोन्थाप्य ॥ अ
ञ्जलिं बध्वा ॥ ॐ इहैवायमितरो जातवेदा देवेभ्यो हव्यं वहतु प्र
जानन् इत्यग्नेरुपस्थानं ॥ ततः पातितदक्षिणजानुः ॥ प्रादेशमि

समा· तो समिधं घृताक्तां तूष्णीमग्नौ क्षिपेत् ॥ ततो ब्रह्मावरणं ॥ ततोग्रे-
णाग्निं परिक्रम्याग्नेर्दक्षिणतोवस्थाय ऊर्द्ध्वजानुः प्रत्यङ्मुखस्ति-
७१ ष्ठन ॥ ब्रह्मासने प्राङ्मुखीम्वारिधारान्दत्वा· तस्या उपरि प्रागग्रान्
कुशानास्तीर्य· वामहस्तानामिकाङ्गुष्ठाभ्यां ब्रह्मासनाद्दर्भमे-
कं गृहीत्वा· नैरृत्यां क्षिपेदनेन ॥ प्रजापतिऋषिर्गायत्री छन्दोऽ राम·

ग्निर्देवता ब्रह्मासनान्तृणनिरसने विनियोगः ॥ ॐ निरस्तः परावसुः
इति तृणान्निरस्य ॥ ततः उदकमुपस्पृश्य ॥ ब्रह्माणमुपवेशयेदने-
न ॥ प्रजापतिऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता ब्रह्मस्थापने विनियो-
गः ॥ ॐ आवसोः सदने सीद· इति कृत्वा स्वनामं ब्रह्माणमुपवेशयेत्
॥ ततो· ब्रह्मोपरि प्रागग्रकुशानास्तीर्य· जलेनाभ्युक्ष्य· ब्रह्माणं ८
धं

समा·
७२

स्पष्टा जपेत् ॥ प्रजापतिऋषिर्गायत्रीछन्दो विष्णुर्देवता जपे वि
नियोगः ॥ ॐ इदं विष्णुर्विचक्रमे त्रेधा निदधे पदं। समूढमस्य
पांसुले ॥ इति जप्त्वा तेनैव पथा परावृत्य स्वस्थानं गच्छेत् ॥ ब्राह्म
णपक्षे वरणप्रतिवचनादिक सूक्ष्मं ॥ ततोग्नेः पश्चात् उदूखल
नेटे पूर्वाग्रान् कुशानास्तीर्य तदुपरि प्रक्षालितमुदूखलं स्थाप

एम·

येत्· ततो व्रीहीन् वा· कांस्येन चरुस्थाल्या वा· उदूखले सक्षिपदनेन
सकृत् ॥ ॐ सविते त्वा जुष्टन्निर्वपामि द्विस्तूष्णीं· तत उपरिकृतद
क्षिणहस्तः पाणिभ्यां प्राङ्मुखो मुशलेन वारत्रयमवघातं कुर्यात्
॥ ततो वारत्रयं सूर्पेण विरेचयेत्· ततस्त्रिः फलीकृतांस्तण्डुलान्
त्रिः प्रक्षाल्य स्थाल्यामुदगग्रे पवित्रे· उदकं च निधाय प्रक्षिपेत् ॥

समा·

हस्तात्पाश्चप्रमाणं· तिर्य्यगूर्द्ध्वं· प्रादेशमात्रं· ततः प्रादेशद्वयप्रमा
णेन· पालाशमेक्षणेन प्रदक्षिणं चालयन् निपुणं पचेत्॥ श्र
तेचरौ· स्रुवगृहीतेनाज्येनाभ्युक्ष्य· उत्तरस्यां दिशि अवतारयेत्
॥ ततः पुनरभिघारयेत्॥ ततो दक्षिणजानुं पातयित्वा· उपरीकृ
तदक्षिणहस्तः करद्वयमधोमुखं भूमावारोप्य भूमिजपं कुर्य्या

७३

राम·

त्॥ परमेष्ठीऋषिरनुष्टुप्छन्दोग्निर्द्देवता भूमिजपे विनियोगः
॥ ॐ इदं भूमेर्भजामह इदं भद्रं सुमङ्गलं॥ परासपत्नान्बाधस्वा
न्येषां विन्दते धनं॥ ततो वसुशब्दमुच्चारयेत्॥ ततो जानुं स्थाप्य·
दक्षिणहस्तेन कुशत्रयं गृहीत्वा· अग्नेरुत्तरादितः प्रदक्षिणक्र
मेण प्रतिऋचं परिसमूहयेत्॥ कौत्स ऋषिर्ज्जगती छन्दोग्नि

समा·

७४

र्देवता पष्ठस्य षडहस्य षष्ठेऽहन्याग्निमारुते शस्त्रे परिसमूह
ने विनियोगः ॥ ॐ इमं स्तोममर्हते जातवेदसे रथमिव सम्महेमा
मनीषया· भद्रा हि नः प्रमतिरस्य संसद्यग्ने सख्ये मारिषामा व
यन्तव· इत्यग्नेरुत्तरतः ॥ ॐ भरामेध्मं कृणवामा हवींषि चि
तयन्तः पर्व्वणा पर्व्वणा वयं ॥ जीवातवे प्रतरं साधया धियोग्ने:

राम·

सख्ये मारिषामा वयन्तव· इति पूर्व्वतः ॥ ॐ शकेम त्वा समिधं साधया
धियस्त्वे देवा हविरदन्त्याहुतं ॥ त्वमादित्यां आवह तान्ह्युश्मस्य
ग्ने सख्ये मारिषामा वयन्तव· इति दक्षिणतः ॥ भूमिं परिसमुह्य· बर्हि
भिरग्रे मूलान्याच्छादयन्· त्रिरावृत्तं पश्चावृत्ते स्वा· पुरस्ताद्दक्षिण
त· उत्तरतः पश्चात्स्तरणं कुर्य्यात् ॥ ततः पूर्व्वोक्तान् खादिरादिन विं



समा·

७५

इति ध्मान् मूलमध्या·ग्रक्रमेण घृताक्तान् प्रादेशद्वयपरिमिता
न्·प्रजापतिं मनसा ध्यात्वा·तूष्णीमग्नौ जुहुयात्॥ ततस्तृणादेवब
र्हिषः साग्रकुशपत्रद्वयं गृहीत्वा·प्रादेशमात्रं कृत्वा·कुशमन्तर्धाय
छिन्द्यादनेन॥ प्रजापतिरृषिः पवित्रे देवते पवित्रच्छेदने विनि
योगः॥ ॐ पवित्रे स्थो वैष्णव्यौ॥ ततोऽद्भिरनुमृज्यादनेन॥ प्रजापति

एम·



ऋषिः पवित्रे देवते पवित्रसंमार्ज्जने विनियोगः॥ ॐ विष्णोर्मनसा
पूते स्थः॥ इति संमृज्याज्यस्थाल्यामुदगग्रे पवित्रे निधायाज्यमाव
पेत्॥ ततो व्यस्तहस्ताङ्गुष्ठोपकनिष्ठाभ्यां गृहीतपवित्राभ्यामाज्य
मूर्द्ध्वं नीत्वा सकृत्क्षिपेदनेन॥ प्रजापतिरृषिराज्यन्देवता·आज्यो
त्पवने विनियोगः॥ ॐ देवस्त्वा सविता पुनात्वच्छिद्रेण पवित्रेण वसोः

15
10
5
0 centimeters 5
10
15
20

समा·

७६

सूर्य्यस्य रश्मिभिः स्वाहा· ततो दिक्षूष्णीं क्षिपेत्· ततः पवित्रे जलेनाभ्युक्ष्य तूष्णीमग्नौ क्षिपेत्॥ ततश्चाज्यपात्रमुदकेनानुमृज्याग्नेरुपरि निधायाग्नेरुत्तरतो वारत्रयमवतारयेत्· इत्याज्यसंस्कारः॥ ॥ एवं स्रुवसंस्कारोपि॥ ॥ ततो भूगतदक्षिणजानुः उदकस्थालीमध्ये कृत्वा· अग्निः पर्युक्षणं कुर्य्यात्॥ प्रजापतिरृषिरदितिर्द्देवतो

एम·

दकाञ्जलिप्रसेचने विनियोगः॥ ॐ अदिते अनुमन्यस्व· इत्यग्नेर्द्दक्षिणतः पूर्व्वायामञ्जलिधारां दद्यात्॥ प्रजापतिरृषिरनुमतिर्द्देवतोदकाञ्जलिप्रसेचने विनियोगः॥ ॐ अनुमते अनुमन्यस्व· इत्यग्नेः पश्चादुत्तरायां॥ प्रजापतिरृषिः सरस्वती देवतोदकाञ्जलिप्रसेचने विनियोगः॥ ॐ सरस्वत्यनुमन्यस्व· इत्यग्नेरुत्तरतः पूर्व्वायां॥ ततः

समा·

७१

प्रजापतिऋषिस्त्रिष्टुप्छन्दः सविता देवता अग्निपर्युक्षणे विनि
योगः ॥ ॐ देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भगाय ॥ दिव्यो ग
न्धर्वः केतपूः केतन्नः पुनातु वाचस्पतिर्वाचं नः स्वदतु· इति होमी
यद्रव्यसहितस्याग्नेर्वारिधारया वेष्टनं कुर्यात् प्रदक्षिणक्रमे
ण ॥ ततो जानु स्थाप्य· समिधमेकां कुशपुष्पफलसहितां गृही

राम·

त्वा· उपरीकृतदक्षिणहस्तो विरूपाक्षं जपेत् ॥ परमेष्ठी ऋषिर्न्नि
गद छन्दः कालाग्निरुद्ररूपोग्निर्द्देवता विरूपाक्षजपे विनियोगः ॥
ॐ तपश्च तेजश्च· श्रद्धा च ह्रीश्च सत्यञ्चाक्रोधश्च त्यागश्च· धृतिश्च
धर्म्मश्च सत्वञ्च वाक् च· मनश्चात्मा च ब्रह्म च तानि प्रपद्ये तानि मा
मवन्तु· ॐ भूर्भुवः स्वरों महान्तमात्मानं प्रपद्ये· विरूपाक्षोसि दन्तां

समा·

७८

गिलस्यतेशस्यापरोंश्रहान्तरिक्षेविमितंहिरण्मयं·तद्देवानांहृ
दयान्ययस्मयकुरुक्षेत्रेन्तःसन्निहितानि·तानिविलमुखविलसाच्च
रक्षन्तोप्रमत्तीश्वनिमिषन्तःतास्त्वं·यन्नेद्वादशप्रज्वालेत्यासन्नः
सरेसम्वत्सरेकामप्रेणयज्ञेनयाजयित्वा·पुनर्ब्रह्मचर्य्यमुपय
न्नितंदेवेषुब्राह्मणस्यहं·मनुष्येषुब्राह्मणोवैब्राह्मणमुपधाव

रामः·

न्नुपत्याधावामिजपन्तं·मामाप्रतिजापीर्जुह्वन्तं·मामाप्रतिहोषीःकु
र्वन्तं·मामाप्रतिकार्षीःत्वांप्रपद्ये·त्वयाप्रसूतइदंकर्मकरिष्यामि·
तन्मेराध्यतां·तन्मेसमृध्यतां·तन्मेउपपद्यतां·समुद्रोमाविश्वव्यचा·
ब्रह्मानुजानातुतुथोमाविश्ववेदाब्रह्मणःपुत्रोनुजानातु·श्वात्रोमा
प्रचेतामैत्रावरुणोनुजानातु·तस्मैविरूपाक्षायदन्ताञ्जयेसमु



समा· द्राय· विश्वव्यचसेन्तुथाय· विश्ववेदसे श्वात्राय· प्रचेतसे सहस्राक्षा
य· ब्रह्मणः पुत्राय नमः॥ इति मंत्रेण कुशमैशान्यां त्यक्त्वा· फलपु
७९ ष्पं ब्रह्मणे निवेद्य॥ दक्षिणजानुं पातयित्वा· घृताक्तां समिधं तू
ष्णीमग्नौ क्षिपेत्॥ ततोऽग्नेः पश्चात् ब्रह्मचारिणं निवेश्य· व्याहृ
तिहोमं कुर्य्यात्॥ प्रजापतिरृषिर्गायत्री छन्दोऽग्निर्देवता· व्याहृति राम·



होमे विनियोगः॥ ॐ भूः स्वाहा॥ प्रजापतिरृषिरुष्णिक्छन्दो वा
युर्देवता· व्याहृतिहोमे विनियोगः॥ ॐ भुवः स्वाहा॥ प्रजापतिरृषि
रनुष्टुप्छन्दः सूर्यो देवता· व्याहृतिहोमे विनियोगः॥ ॐ स्वः स्वाहा
॥ प्रजापतिरृषिर्बृहती छन्दो· बृहस्पतिर्देवता महाव्याहृतिहोमे
विनियोगः॥ ॐ भूर्भुवः स्वः स्वाहा॥ ततः पश्चाडोदननाम्नोऽग्नेः चरुं

0 centimeters 5
10
15
20

समा· निधाय· स्रुवेण चरौ घृतं प्रक्षिपेत्· तत्र चरौ पूर्वाग्ररेखाद्वयं उत्त
राग्ररेखाद्वयञ्च कुर्यात्· एवन्नवधाविभक्तं भवति· ततो वारच
८० तुष्टयं· स्रुवेणाज्यं गृहीत्वा स्रुचि निधाय· ॐ अग्नये स्वाहा· इत्य
ग्नेरुत्तरभागे प्राग्घृतं स्रुचैव जुहुयात्॥ पुनरपि वारचतुष्टयं· स्रु
वेणाज्यं गृहीत्वा स्रुचि निधाय· अग्नेर्दक्षिणभागे· प्राग्घृतं स्रुचा राम·

जुहुयात्· ॐ सोमाय स्वाहा॥ ततः स्रुचि स्रुवेण घृतं दत्वा· चरोर्म
ध्यभागात्· पूर्वभागञ्च मेक्षणेन· प्रचुरतरं हविरवदाय· स्रुचि
दत्वा· पुनः स्रुवेण स्रुचि घृतन्दत्वा· अवदानस्थानानि घृतेन
पूरयित्वा· अग्नेर्मध्ये· स्रुचा जुहुयात्॥ ॐ सवित्रे स्वाहा॥ ततः
स्रुवेण स्रुचि वारद्वयं घृतं दत्वा· चरौरैशान्यां मेक्षणेन· प्रचु

0 centimeters 5 10 15 2.0

समा·

८

त्तरं हविरवदाय स्रुचि निःक्षिप्य · वारद्वयं स्रुवेण घृतं दत्वा · अ
ग्नेरैशान्यां स्रुचैव जुहूयात् ॥ ॐ अग्नये स्विष्टकृते स्वाहा · अव
दानस्थानं माज्येन पूरयेत् ॥ एष चतुरवर्त्ति होमप्रयोगः यद्य·
पि चतुरवर्त्ति · पञ्चावर्त्ति प्रयोगो ग्रन्थकारेण लिखितो · तथापि
चतुरवर्त्ति यजमानेन चतुरवर्त्ति होम एव कर्त्तव्यः तथैव व्यवहा

राम·

रात् · जामदग्न्या वत्सविद · आर्ष्टिषेणास्तथैव च ॥ पञ्चावर्त्ति
न एवैते · अन्ये चतुरवर्त्तिनः ॥ पञ्चावर्त्तिनां तु · पञ्चवार गृही
तमाज्यं स्रुचि स्रुवेण कृत्वा अग्नेरुत्तरतः प्राग्घृतं स्रुचैव जुहु
यात् ॥ ॐ अग्नये स्वाहा ॥ ततः पुनरपि स्रुवेण पञ्चवार गृहीत
माज्यं स्रुचि कृत्वा अग्नेर्दक्षिणतः प्राग्घृतं स्रुचैव जुहुयात् ॥

समा· ॐ सोमाय स्वाहा ॥ ततः स्रुवेणाज्यं स्रुचि कृत्वा· चरोर्मध्यभागात्
पूर्वभागात्· पश्चार्द्धाच्च वारद्वयं मेक्षणेन हविरवदाय स्रुचि प्र
६२ क्षिप्य· अवदानस्थानानि घृतेनापूर्य्य· पुनरपि घृतं स्रुवेण
स्रुचि दत्वाग्नेर्मध्यभागात् स्रुचा जुहुयात् ॥ ॐ सवित्रे स्वाहा·
॥ ततः स्रुवेणाज्यं वारद्वयं स्रुचि दत्वा· चरोरैशान्यां मेक्षणेन प्र राम·

माज्येन

चुरस्रं हविरवदाय स्रुचि प्रक्षिप्य· पुनरपि वारद्वयं स्रुवेण घृतं
स्रुचि प्रक्षिप्याग्नेरैशान्यां स्रुचा जुहुयात्· ॥ ॐ अग्नये स्विष्टकृ
ते स्वाहा ॥ अवदानस्थानं पूरयेत् ॥ इति पञ्चावर्त्तिप्रयोगः ॥ य
द्यपि चतुरवर्त्ति यजमानस्तथापि पञ्चावर्त्तेनोपि रचना· कार्य्ये·
ति न्यायादुभयमपि लिखितं ॥ ॥ ततो वह्नौ घृताक्तमेक्षणप्र

15
10
5
0 centimeters 5 10 15 20

समा. क्षेपः॥ ततो व्याहृतिहोमः॥ प्रजापतिऋषिर्गायत्री छन्दोग्निर्देव
ता व्याहृतिहोमे विनियोगः॥ ॐ भूः स्वाहा॥ प्रजापतिऋषिरुष्णि
८३ क् छन्दो वायुर्देवता व्याहृतिहोमे विनियोगः॥ ॐ भुवः स्वाहा॥ प्रजा
पतिऋषिरनुष्टुप्छन्दः सूर्यो देवता व्याहृतिहोमे विनियोगः॥ ॐ राम.
स्वस्वाहा॥ प्रजापतिऋषिर्बृहती छन्दो बृहस्पतिर्देवता महाव्याहृ

तिहोमे विनियोगः॥ ॐ भूर्भुवः स्वः स्वाहा॥ इति सावित्रिचरुक
र्म्म॥ ॥ उभयोः स्वातन्त्र्यान्सावित्रचरुकर्म्म वामदेव्यगानान्ते
सामान्यपुनरग्निस्थापनं विधाय समावर्त्तनं कुर्य्यादिति केचि
त्॥ ॥ अथ समावर्त्तनारम्भः॥ तदर्थं पुनरपि व्याहृतिहोमः॥ प्र
जापतिऋषिर्गायत्री छन्दोग्निर्देवता व्याहृतिहोमे विनियोगः॥



समा·
८४

ॐ भूः स्वाहा ॥ प्रजापतिऋषिरुष्णिकछन्दो वायुर्देवता व्याहृति·
होमे विनियोगः ॥ ॐ भुवः स्वाहा ॥ प्रजापतिऋषिरनुष्टुप्छन्दः
सूर्यो देवता· व्याहृति होमे विनियोगः ॥ ॐ स्वः स्वाहाः ॥ प्रजाप
तिऋषिर्वृहती छन्दो वृहस्पति र्देवता· महाव्याहृति होमे विनियो
गः ॥ ॐ भूर्भुवः स्वः स्वाहा ॥ ततोग्ने पश्चादाचार्यः प्रागग्रेषु

राम·



कुशेषु उत्तराभिमुखः उपविश्य· ब्रह्मचारी च उत्तराग्रेषु कुशे
षु· प्राङ्मुख उपविशति· ततो व्रीहियवादि सर्वौषधियुताभ्योद्
भ्यो नामासेन चन्दनादि गन्धयुताभ्यः ऽ षडुभ्या भ्योऽञ्जलि
मादाय ब्रह्मचारी भूमौ त्यजेदनेन ॥ प्रजापतिऋषिरग्न्याद
यो देवता समावर्त्तने विनियोगः ॥ ॐ ये प्स्वन्तरग्नयः प्रवि

15
10
5
0 centimeters 5
10
15
20

समा. ष्या गोह्य उपगोह्यो मयूखो मनोहाः॥ स्वलो विरुजस्तनूदूषि
रिन्द्रियहा अतितान्सृजामि॥ अथापरमञ्जलिं तत एवा
८५ दाय भूमौ त्यजति॥ प्रजापतिरृषिरनुष्टुप्छन्दो यो वा एदयोदे
वता समावर्त्तने विनियोगः॥ ॐ यदपां घोरं यदपां क्रूरं यदपा
मशान्तमति तत्सृजामि॥ ततः प्रकृताभ्य एवाद्भ्यो मञ्जलिमा राम.

दायात्मानमभिषिञ्चति॥ प्रजापतिरृषिरोचनाग्निर्देवतास
मावर्त्तने विनियोगः॥ ॐ यो रोचनस्तमिह गृह्णामि तेनाहं मामभि
षिञ्चामि॥ पुनरपि ताभ्य एवाद्भ्यो मञ्जलिमादायात्मानम
भिषिञ्चति॥ प्रजापतिरृषिरोचनाग्निर्देवता समावर्त्तनेवि
नियोगः॥ ॐ यशसे तेजसे ब्रह्मवर्च्चसाय बलायेन्द्रियाय वीर्य्याया

0 centimeters 5 10 15 2.0



समा· वाग्धायशपश्योषाय निध्याअपचित्यै ॥ पुनरपि तथैवाक्षताञ्ज
लिमादायात्मानमभिषिञ्चति ॥ प्रजापतिर्ऋषिः सप्तपदीपं
८६ क्तिश्छन्दः अश्विनौ देवते समावर्त्तने विनियोगः ॥ ॐ येनस्त्रि
यसँकृणवतं येनापामृशानं सुरां येनाक्षानभ्यषिञ्चतं येने
मां पृथिवी महीं यशान्तदश्विना यशस्तेन मामभिषिञ्चतं ॥ एम·
मञा ए·पा



पुनस्तनएवाञ्जलिमादाय मूर्द्धिं वौर्कमात्मानमभिषिञ्चति ॥ ततः
समीपएवोत्थाय सूर्य्यमुपतिष्ठतु ॥ प्रजापतिर्ऋषिः सूर्य्यो देव
ता सूर्य्योपस्थाने विनियोगः ॥ ॐ उद्यन्भ्राजभृष्णुभिरिन्द्रो मरु
द्भिरस्थातू प्रातर्य्यावभिरस्थातू ॥ दशसनिरसि दशसनिं मा कुर्व्वा
त्वाविसाम्या माविश ॥ प्रजापतिर्ऋषिः सूर्य्यो देवता सूर्य्योपस्थाने

समा·

७

विनियोगः॥ ॐ उग्रश्चाजभृत्तिभिरिन्द्रो मरुद्भिरस्त्वान् सान्तपने
भिरस्त्वान्॥ शान्तसनिरसि शान्तसनिर्म्मा कुर्वीत्वा विशास्या मावि
शा॥ प्रजापतिऋषिः सूर्य्यो देवता सूर्य्योपस्थाने विनियोगः॥ ॐ
उग्रश्चाजभृत्तिभिःरिन्द्रो मरुद्भिरस्त्वान् सायंपारभिरस्त्वान्॥
सहस्वसानिरसि सहस्वसानिर्म्मा कुर्वीत्वा विशास्या माविशा॥ प्रजा

राम·

पतिऋषिरनुष्टुप्छन्दः सूर्य्यो देवता सूर्य्योपस्थाने विनियोगः॥
ॐ चक्षुरसि चक्षुस्त्वमस्य वमे पाप्मानं जहि॥ सोमस्त्वा राजा
वर्नेन मस्तेस्तु मामा हिंसीः॥ ॥ ततो ब्रह्मचारी स्वयमेव मेख
ल्लामधस्तादवतारयेदनेन॥ प्रजापतिऋषिस्त्रिष्टुप्छन्दो वरु
णो देवता मेखलामोक्षणे विनियोगः॥ ॐ उदुत्तमं वरुणपाश

समा॰ मस्मद्वाधमंविमध्यमंश्रथाय़॥अथावय़मादित्यव्रतेतवा
नागसोअदितय़ेस्याम॥तदन्वाचार्य्योब्रह्मचारिणोदण्डकृ
९८ ष्णाजिनभ्यापनीय़॰व्याहृतिहोमंकुर्य्यात्॥प्रजापतिऋ
षिर्गायत्रीछन्दोऽग्निर्देवताव्याहृतिहोमेविनियोगः॥ॐभूःस्वा
हा॥प्रजापतिऋषिरुष्णिक्छन्दोवायुर्देवताव्याहृतिहोमेवि राम॰

नियोगः॥ॐभुवःस्वाहा॥प्रजापतिऋषिरनुष्टुप्छन्दःसूर्य्यो
देवताव्याहृतिहोमेविनियोगः॥ॐस्वःस्वाहा॥प्रजापतिऋषि
र्बृहतीछन्दोबृहस्पतिर्देवतामहाव्याहृतिहोमेविनियोगः॥ॐ
भूर्भुवःस्वःस्वाहा॥ततोब्रह्मचारीब्राह्मणान्भोजयित्वा॰स्व
य़ञ्चकिञ्चिद्दुग्धमेवभुक्त्वा॰शिखावर्ज्जंकेशनखलोमा

समा.
निवापयेत् ॥ ततो घटाम्बुना स्नातोलंकृतः ॥ अहते वाससी प
रिधाय. उष्णीषञ्च. मंत्रानुमंत्रितं द्वि यज्ञोपवीतं परिधाय.
८९
स्रजमादाय वध्नात्यनेन ॥ प्रजापति ऋषिर्गायत्री छन्दः श्री
देवता स्रग्वन्धने विनियोगः ॥ ॐ श्रीरसि मयि रमस्व ॥ इ
ति वध्नाति ॥ ततो पुष्पमाल्यं ॥ ततः वध्वा. उपानहौ परिद
राम.

धाति ॥ प्रजापति ऋषि रुपानद्देवतो. उपानत्परिधाने विनि
योगः ॥ ॐ नेत्र्यौ स्थो नयतन्मां ॥ ततो वंशदण्डं गृह्णाति ॥ प्रजा
पति ऋषिरिन्द्रो देवता वैणवदण्ड ग्रहणे विनियोगः ॥ ॐ गं
न्धर्वोस्युपारव उपमामव ॥ ततश्छत्रं गृह्णाति तूष्णीं ॥ ततः प
रिवत्तसहितमाचार्य्यमुपगम्य वीक्षेत् ॥ प्रजापति ऋषिरावा

समा·

९०

र्थे परिषदो देवताभ्राचार्य्यन्तत्परिषद्वीक्षणे विनियोगः॥ ॐ
यक्षमिव चक्षुषः प्रियो वो भूयासं· ततउपविश्य॥ मुखम
वान्‌प्राणान्‌ प्रसारिनाङ्गुलिना करेण स्पृशेत्॥ प्रजापति
ऋषिरनुष्टुप्छन्दो जिह्वा देवता मुखपिधाने विनियोगः॥ ॐ
ओष्ठापिधाना नकुली दन्तपरिमितः परिः॥ जिह्वे माविह्वलो

राम·

वाचं चारु माद्येह वादय॥ ततश्छत्रं गृहीत्वा रथं सकूवरमभि
स्पृशेत्॥ प्रजापतिऋषिरनुष्टुप्छन्दो रथो देवता रथाभि
मर्षणे विनियोगः॥ ॐ वनस्पते वीड्वङ्गो हि भूया अस्मत्स
खा प्रतरणः सुवीरः॥ गोभिः सन्नद्धो असि वीडयस्व· ततश्च
तुर्थपादे रथमाक्रम्योपविशति॥ ॐ आस्थाता ते जयतु जे

ग्र·पा

समा·
९१

त्वा नि· इति मंत्रेण· ततः प्राङ्मुख उदङ्मुखो वागत्वा प्रदक्षिणमग्न
निमि· कृत्वाचार्य्यसमीपङ्गच्छेत्· ततश्चाचार्य्यस्तमर्घादिना
पूजयेत्॥ ततश्चाचार्य्याय परिषद्ब्राह्मणेभ्यश्च· अहंभो अ
भिवादये· इत्यभिवादनं ब्रह्मचारी कुर्य्यात्॥ तेपि प्रत्यभिवा
दनं कुर्य्युः॥ ततो आपुच्छाम्भवासौम्य· इत्वाचार्य्यो क्रूयात्· ततः

राम·

आचार्य्यः सर्वकर्म्मसमाधानार्थं प्रायश्चित्तरूपं शाट्यायन
होमं कुर्य्यात्॥ ॥अथ शाट्यायनहोमप्रयोगः॥ तत्र संकल्पः
॥ॐ अद्यामुककर्म्मणि समयाद्यतिक्रमोपजातवैगुण्यप
समाधानार्थं शाट्यायनहोमम् अहं करिष्ये॥ इति संकल्पं कु
र्य्यात्॥ ततस्तदर्थं व्याहृतिहोमः॥ प्रजापतिऋषिर्गायत्री छ

0 centimeters 5 10 15 20

समा

६२

न्दोग्निर्द्देवता व्याहृति होमे विनियोगः ॥ ॐ भूः स्वाहा ॥ प्रजाप
तिऋषिरुष्णीकछन्दो वायुर्द्देवता व्याहृति होमे विनियोगः ॥
ॐ भुवः स्वाहा ॥ प्रजापतिऋषिरनुष्टुप् छन्दः सूर्य्यो देवता
व्याहृति होमे विनियोगः ॥ ॐ स्वः स्वाहा ॥ प्रजापतिऋषिर्वृ
हती छन्दो बृहस्पतिर्द्देवता महाव्याहृति होमे विनियोगः ॥ ॐ

राम

भूर्भुवः स्वः स्वाहा ॥ ततः प्रायश्चित्त होम ॥ प्रजापतिऋषिरग्नि
र्द्देवता प्रायश्चित्त होमे विनियोगः ॥ ॐ पाहि नो अग्न एनसे स्वा
हा ॥ प्रजापतिऋषिर्व्विश्वेदेवा देवता प्रायश्चित्त होमे विनियो
गः ॥ ॐ पाहि नो विश्वदेवसे स्वाहा ॥ प्रजापतिऋषिरनुष्टुप्
छन्दो विश्वावसुर्द्देवता प्रायश्चित्त होमे विनियोगः ॥ ॐ यज्ञं पाहि

15 10 5

0 centimeters 5 10 15 20



समा विभावसोस्वाहा॥ प्रजापतिऋषिर्गायत्री छन्दः शतक्रतुर्देव
ताशायश्चित्ते होमे विनियोगः॥ ॐ सर्वं पाहि शतक्रतो स्वाहा॥
९३ प्रजापतिऋषिर्गायत्री छन्दोग्निर्देवता प्रायश्चित्ते होमे विनि
योगः॥ ॐ पुनरूर्जा निवर्त्तस्व पुनरग्न इषा· युषा· पुनर्नः पाह्यं
हसः स्वाहा॥ प्रजापतिऋषिर्गायत्री छन्दोग्निर्देवता प्रायश्चित्ते राम

होमे विनियोगः॥ ॐ सहरय्या निवर्त्तस्वाग्ने पिन्वस्व धारया॥
विश्वप्स्न्या विश्वतस्परि स्वाहा॥ प्रजापतिऋषिरनुष्टुप्छ
न्दोग्निर्देवता प्रायश्चित्ते होमे विनियोगः॥ ॐ अज्ञातं यदना
ज्ञातं यज्ञस्य क्रियते मिथस्तु॥ अग्ने तदस्य कल्पय त्वं हि वे
त्थ यथायथं स्वाहा॥ प्रजापतिऋषिः पङ्क्तिछन्दः प्रजापतिर्देवता

समा प्रायश्चित्तहोमे विनियोगः ॥ ॐ प्रजापते न त्वदेतान्यन्यो वि-
श्वा जातानि परिता त्वं बभूव ॥ यत्कामास्ते जुहुमस्तन्नो अस्तु व-
९४ यं स्याम पतयो रयीणां स्वाहा ॥ ततः प्रजापतिर्ऋषिर्गायत्री छन्दो-
ऽग्निर्देवता व्याहृतिहोमे विनियोगः ॥ ॐ भूः स्वाहा ॥ प्रजापतिर्ऋ-
षिरुष्णिक्छन्दो वायुर्देवता व्याहृतिहोमे विनियोगः ॥ ॐ भुवः राम

स्वाहा ॥ प्रजापतिर्ऋषिरनुष्टुप्छन्दः सूर्यो देवता व्याहृतिहोमे वि-
नियोगः ॥ ॐ स्वः स्वाहा ॥ प्रजापतिर्ऋषिर्बृहती छन्दो बृहस्पति-
र्देवता महाव्याहृतिहोमे विनियोगः ॥ ॐ भूर्भुवः स्वः स्वाहा ॥ ततः
प्रादेशमितां समिधं घृताक्तां तूष्णीमग्नौ क्षिपेत् ॥ ततः पुनरपि
भूगतदक्षिणजानुः उदकस्थालीमग्रे कृत्वा अग्निः पर्युक्षणादि


15
10
5
0 centimeters 5
10
15
20

समा· कं कुर्य्यात्॥ प्रजापतिऋर्षिस्त्रिष्टुप्छन्दः सवितादेवता अग्निप
र्युक्षणे विनियोगः॥ ॐ देव सवितः प्रसुव यज्ञं प्रसुव यज्ञपतिं भ
९५ गाय॥ दिव्यो गन्धर्वः केतपूः केतन्नः पुनातु वाचस्पतिर्वाचन्नः
स्वदतु· इति होमद्रव्यसहितस्याग्नेर्वारिधारया वेष्टनं कुर्य्यात्॥ राम·
ततः प्रजापतिऋर्षिरदितिर्द्देवतोदकाञ्जलिप्रसेचने विनियो

गः॥ ॐ अदिते अनुमंस्याः इत्यग्नेर्द्दक्षिणतः पूर्व्वाग्रां॥ प्रजाप
तिऋर्षिरनुमतिर्द्देवतोदकाञ्जलिप्रसेचने विनियोगः॥ ॐ अ
नुमते अन्वमंस्याः इति पश्चादुत्तराग्रां॥ प्रजापतिऋर्षिः सरस्व
ती देवतोदकाञ्जप्रसेचने विनियोगः॥ ॐ सरस्वत्यनुमंस्याः इ
त्युत्तरतः पूर्व्वाग्रां· पूर्व्वविपरीतामञ्जलिधारान्दद्यात्॥ ततस्त


15
10
5
0 centimeters 5
10
15
20

समा·

९६

रण क्रमेण वर्हिहुत्वाप्य· जुह्विकां च धृत्वा· वामहस्ते कृत्वा ॥ प्रजाप
ति ऋषिर्व्वायोर्देवता दर्भं गृहण म्यग्न्ने विनियोगः ॥ ॐ ग्र ऋंषि
हा ताग्र्यनुवयः इति मूलमध्याग्रक्रमेण जुह्विकां घृताक्तां कृत्वा·
जलेनाभ्युक्ष्याग्नौ क्षिपेदनेन ॥ प्रजापतिऋषिरनुष्टुप्छन्दो रु
द्रोदेवता दर्भजुह्विकाहोमे विनियोगः ॥ ॐ यः पशूनामधिपती

राम·

रुद्रस्तन्तिचरो वृषा ॥ पशूनस्माकं माहिंसीरेतदस्तु हुतन्तवस्वा
हा ॥ तत उत्थाप्य· ब्रह्मचारी दक्षिणहस्तस्पृष्टस्रुवेण फलपुष्प
घृतपूर्णेन पूर्णाहुतिं दद्यात् ॥ प्रजापतिऋषिर्विराट्छन्दः इ
न्द्रोदेवता यशस्कामस्य यजनीयप्रयोगे विनियोगः ॥ ॐ पूर्णाहो
मं यशसे जुहोमि यो स्मै जुहोति वरमस्मै ददाति ॥ वरं वृणे यश


0 centimeters 5
10
15
20
25

समा·

६

स्ताभामिलोके स्वाहा· इति पूर्णाहुतिं दद्यात्· ततः वसुभ्यः स्वाहे
त्यविछिन्नामाज्यधारान्दद्यात्॥ ॥ततो ब्रह्मदक्षिणा॥ कुश
त्रयाक्षतजलान्यादाय॥ ॐ अद्य कृतैतत्समावर्त्तनहोमक
र्म्मणि कृताकृतावेक्षणरूपब्रह्मकर्म्मप्रतिस्थार्थमिदं पूर्णा राम·
पात्रं प्रजापतिदैवतं ब्रह्मणे दक्षिणां नमः· इति दक्षिणान्दद्यात्

॥ततोग्निप्रदक्षिणक्रमेण हस्ते गृहीत्वा ब्रह्मणोत्थापनं· ग्रन्थिवि
मोको वा॥ ततः स्रुवलग्नसघृतभस्मना त्र्यायुषकरणं॥ ॐ त्र्या
युषं यमदग्नेरिति हृदि॥ ॐ कस्यपस्य त्र्यायुषमिति दक्षिणबा
हुमूले॥ ॐ अगस्त्यस्य त्र्यायुषमिति वामबाहुमूले॥ ॐ यद्देवा
नां त्र्यायुषमिति कण्ठे॥ ॐ तन्नोस्तु त्र्यायुषमिति शिरसिः

समा.
९८

विन्दुकुर्य्यात्॥ ब्रह्मचारिपक्षे· तन्त्रोइत्यस्य स्थाने तत्रेइति वि
शेषः॥ ततः पात्रस्थं जलमपनीय पात्रमन्यजलेनापूर्य्य· तत्र कु
शुमं प्रक्षिप्य॥ दक्षिणादानं॥ कुशत्रयाक्षतजलान्यादाय॥ ॐ
अद्य कृतैतत्सावित्रचरुहोमसमावर्त्तनकर्म्मप्रतिष्ठार्थं गामे
कां रुद्रदैवतां यथानामगोत्राय ब्राह्मणाय दक्षिणान्दातुमहं

राम.

समुत्सृज्य॥ यथाशक्ति स्वर्णं वा॥ ॥ ततः पूर्ववत्वामदेव्य
गानं कुर्य्यात्॥ ॥ ततः दुर्व्वाक्षतदानं॥ अत्र प्रभृति श्रोत्रियस
हभोजनम्॥ ॥ इतिच्छन्दोगानां विवाहादिपद्धतिः समाप्ता॥
गुरु२ नेपालीयपुस्तकेस्थं सम्वत् ९११ श्री सम्वत् १९६४ साके स
म्वत् १८२९ फाल्गुणमासे शुक्लपक्षे अष्टमी सोमवारे लिखि

0 centimeters 5 10 15 20 25



समा.
९९

तमिदम् श्रीगोविन्दलालशर्म्मणेन लिखितमिदम् केषेनछ
न्दोगानां दशकर्म्मपद्धतिः ॥ ॥ शुभम् ॥ तैलाद्रक्षेज्जलाद्रक्षे
च्छीराद्रक्ष च पुस्तकान् ॥ केषेन लिखितं कृनं पुत्रवत्प्रतिपा
लयेत् ॥ शुभ सर्व्वदा ॥ शुभं ॥ ॐ ॥ ॥ ॥ ॥

राम:



स्यास्य अनावृधः ॥ घृतश्चुतो मधुश्चुतो [illegible] विराजो ना
मकामदुघा अक्षीयमाणाः ॥ इति पठित्वा वरः शिरसि अक्षतादिकं
दत्वा यज्ञोपवीतं परिदधाति ॥ ॥ अथाष्टमंगल पढनीयं ॥ ॐ
आशुः शिसानो वृषभो न भीमो घनाघनो क्षोभनश्चर्षणीनां ॥ सं
कंदनेनानिमिषेणाजिष्णुना सत्कारेणादुश्च्यवनेन धृष्णुना ॥ त

0 centimeters 5
10
15
20



15
10
5
0 centimeters 5
10
15
20

दिन्द्रगाजय

वरणा.
1

१ओं नमः श्रीगणेशाय ॥ ॥ अथ आचार्य्यवरणं वक्षे ॥ ओं अद्यामु
कमासे अमुकपक्षे अमुकतिथौ. अमुकगोत्रस्य यथानामधेयस्य
मम नामकरणा. अन्नप्राशन. चूडाकरणोपनयनादिकर्म्म कर्त्तु
मात्मानं वरयितुं अमुकगोत्रं अमुकप्रवरं श्री अमुकशर्म्माणं ब्रा
ह्मणमेभिः पुष्पचन्दनताम्बूलयज्ञोपवीतवासोभिराचार्य्यत्वे.

राम.
1

त्वामहं वृणे. इति कुमारः ॥ आचार्य्यवरणु प्रात् ॥ ओं वृतोस्मीति
आचार्य्यः ॥ ओं यथाविहितं कर्म्म कुरु इति कुमारः ॥ ओं करवाणी
ति आचार्य्यो वदेत् ॥ ॥ अथ षोडशमातृकापूजाविधिर्लिख
यते ॥ प्रातःकाले स्नातः कृतनित्यक्रियेण आचार्य्यः प्राङ्मुखवउ
दङ्मुख उपविश्य. आचम्य ॥ ज्वालितदीपमागत्य ॥ शुक्लांवरः

0 centimeters 5 10 15 20



मात

२

धरः कुशहस्तः ॥ यवाक्षतविकारान् सदुर्बां स्वकरेण मपान् षोड
शगौर्यादि कृत्वा भीत्यां पंक्तिक्रमेणस्थापयेत् यथा ॥ ॥ ऋषि
श्छन्दः ॥ संकल्पः ॥ कुशाक्षततिलजलान्यादाय ॥ ॐ अद्यामुक
मासे ऽमुकपक्षे ऽमुकतिथौ अमुकगोत्रस्यामुरव्य कुमारस्य
कर्तव्यनामकरण अन्नप्राशन चूडाकरणोपनयनादि विवाह

राम

२



यथाकर्म्मनिमित्तकगणपतिदुर्गाश्रीसहिताः गौर्यादि षोडश मा
तृ रहं पूजयिष्ये ॥ इति संकल्पः ॥ ॥ तत्र प्रथमे ॥ गणपतिः गौरी
पद्माशचीमेधा सावित्री विजया जया ॥ देवसेना स्वधा स्वाहा मात
रो लोकमातरः ॥ धृतिः पुष्टिस्तथा तुष्टि स्तथात्म कुलदेवता दुर्गाश्रीः
॥१९॥ तत्राक्षतराशिषु रक्षिका स्ववाप्रत्येकं स्पृशेत् ॥ तत्र क्रमः ॥ कुशे

0 centimeters 5 10 15 20

मातृ न॥ प्रथमे॥ ॐ गणपतिरसि· ॐ गौर्यसि· ॐ पद्मासि· ॐ सच्यसि·
ॐ मेधासि· ॐ सावित्र्यसि· ॐ विजयासि· ॐ जयासि· ॐ देवसेनासि·
२ ॐ स्वधासि· ॐ स्वाहासि· ॐ मातरस्य· ॐ लोकमातरस्य· ॐ धृतिर
सि· ॐ पुष्टिरसि· ॐ तुष्टिरसि· ॐ आत्मकुलदेवतासि· ॐ दुर्गासि· राम
ॐ श्रीरसि॥ इति प्रत्येकं राशिकां स्पृष्ट्वा॥ ततः अक्षतमादाय· गणा ३

पति दुर्गाश्रीसहितान् षोडशमातृकानावाह्य स्थापयेत्॥ तत्र क्रमः॥
ॐ भूर्भुवः स्वः गणपते इहागच्छ इह तिष्ठ· एवं क्रमेण गौर्यादि॥ त
तः अक्षतमादाय॥ ॐ मनोजूतिर्जुषतामाज्यस्य बृहस्पतिर्यज्ञमि
मं तनोत्वरिष्टं यज्ञं समिमं दधातु॥ विश्वेदेवास इह मादयन्तामों
प्रतिष्ठ· गणपति दुर्गाश्री सहिताः षोडशमातरः सुप्रतिष्ठिता भवन्तु॥


15
10
5
0 centimeters 5
10
15
20

मा० त्
४

इत्यक्षतमाकीर्य्य प्रतिष्ठां कुर्य्यात् ॥ तत्र पूजयेत् ॥ ततः पाद्यादिं दद्यात् ॥ ॐ एतानि पाद्यादिनि ॐ गणपतये नमः ॥ इदमनुलेपनं ॐ गणपतये नमः ॥ इदं सिंदुरं ॐ गणपतये नमः ॥ इदमक्षतं ॐ गणपतये नमः ॥ इदं पुष्पं गणपतये नमः इति पुष्पैस्त्रिः पूजयेत् ॥ एतानि गन्ध पुष्प धूपदीप ताम्बूल यथाभाग नैवेद्यानि ॐ गणपतये नमः ॥

राम०
४

ॐ गणानां त्वा गणपतिं हवामहे प्रियाणां त्वा प्रियपतिं हवामहे निधीनां त्वा निधिपतिं हवामहे वसो मम आहमजानि गर्भधमा त्वमजासि गर्भधं ॥ प्रणमेत् ॥ अनेनैव क्रमेण सर्वंत्र पूजयेत् ॥ एतानि पाद्यादिनि एषो र्घः ॐ गौर्य्यै नमः ॥ चन्दनाक्षतपुष्पादिकं दद्यात् ॥ एतानि गन्ध पुष्प धूपदीप ताम्बूल यथाभाग नैवेद्यानि ॐ



मा॰ह॰
५

गौर्यै नमः ॥ एवं ॐन पद्मादि पाद्यादिभिः प्रत्येकं पूजयेत् ॥ ॐ प
द्मायै नमः ॥ ॐ शच्यै नमः ॥ ॐ मेधायै नमः ॥ ॐ सावित्र्यै नमः ॥ ॐ वि
जयायै नमः ॥ ॐ जयायै नमः ॥ ॐ देवसेनायै नमः ॥ ॐ स्वधायै नमः ॥
ॐ स्वाहायै नमः ॥ ॐ मातृभ्यो नमः ॥ ॐ लोकमातृभ्यो नमः ॥ ॐ
हृष्ट्यै नमः ॥ ॐ पुष्ट्यै नमः ॥ ॐ तुष्ट्यै नमः ॥ ॐ आत्मकुलदेवतायै

राम॰
५



नमः ॥ ॐ दुर्गायै नमः ॥ ॐ श्रियै नमः ॥ एवं प्रत्येकं गन्धपुष्पसिन्दूराद्यैर्नै
वेद्यादिभिर्दुर्गाश्रीसहिताः षोडशमातरः पूज्याः ॥ ॥ ततः ॐ गण
पतिदुर्गाश्रीसहिताः षोडशमातरः पूजिताः क्षमध्वं ॥ इति नमस्कृत्य वि
सर्जयेत् ॥ ॐ श्रीमेसिरमत्त्व इति त्रिपं नमस्कृत्य विसर्जयेत् ॥ ॥
अथ वसोर्द्धारान्दद्यात् ॥ ततः कांस्यार्घस्थघृताभिधारातेनः त्रिनौपी

मातृ
६

ठेवातेषामुपरि त्रिः पंचसप्त घृतधारा उत्तरोत्तरक्रमेण दद्यात् ॥
फलप्रतिछेदनेनानेन मंत्रेण ॥ ॐ वसोः पवित्रमसि शतधारं वसोः
पवित्रमसि सहस्रधारं देवस्त्वा सविता पुनातु ॥ वसोः पवित्रेण शत
धारेण सुप्वा कामधुक्षः ॥ इति मंत्रेण दद्यात् ॥ ततस्तांश्च फलादिभिः
प्रतिछेदत् ॥ इति मात्रिकापूजाविधिः ॥ ॥

घा

रामः
६

अथाभ्युदयिकश्राद्धप्रयोगः ॥ तत्र दक्षिणोत्तरक्रमेण द्वादशस्थाने षट्प्रसे
कमासादितद्रव्यं ज्वालितदीपं श्राद्धदेशमागत्याचम्य प्राङ्मुख उदङ्मुखो वा
उपविशेः ॥ सर्वं सव्येन कर्तव्यं ॥ ऋजुत्वपं कुशाः ॥ तिलस्थाने सर्वे रेवका
र्यं ॥ तत्र क्रमः ॥ ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा यः स्मरेत्पु
ण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥ ॐ पुण्डरीकाक्षः इति मंत्रेणा आ

0 centimeters 5 10 15 20

श्राभ्यु·
७

द्वीप इत्यादि कुशोदकेन सिंचयेत्॥ ततो नान्दिमुखश्राद्धसंकल्पं कुर्या-
त्॥ कुशाक्षतयवजलान्यादाय॥ ॐ अद्यामुकमासे अमुकपक्षे अमुकति-
थौ अमुकगोत्रस्यामुककुमारस्य कर्त्तव्यनामकरण· अन्नप्राशन· चू-
डाकरणोपनयनादि· विवाह· यथानाम· निमित्तक नान्दीमुखाभ्युदयिक
श्राद्धमहं करिष्ये॥ इति संकल्पं कुर्यात्॥ ततः गायत्रीं त्रिर्ज्जपित्वा॥ ॐ दे-

राम

वताभ्यः पितृभ्यश्च महायोगिभ्य एव च॥ नमः स्वधायै स्वाहायै नित्यमेव
भवन्त्विति॥ इति त्रिर्ज्जपित्वा॥ कुशाक्षतयवजलांन्यादाय॥ ॐ अद्यावि-
श्वेदेवा इदमासनं वो नमः॥ पुनः २॥ पुनः सव्येन कुशाक्षतयवजलान्यादाय॥
ॐ अद्यामुकगोत्रे मातरमुकदेवि नान्दीमुखि इदमासनं तुभ्यं वृद्धिः॥
एवं पितामही प्रपितामहीभ्यां दद्यात् ३॥ कुशाक्षतयवजलान्यादाय॥ ॐ

0 centimeters 5 10 15 20 25

आमु
८

अद्यामुकगोत्रपितरमुकशर्म्मन्नान्दीमुखइदमासनंतुभ्यंवृद्धिः॥एवंपि
तामहप्रपितामहयोरपि३॥कुशत्रयजवजलान्यादाय॥ॐअद्यामुकगो
त्रमातामहअमुकशर्म्मन्नान्दीमुखइदमासनंतुभ्यंवृद्धिः॥एवंप्रमाता
महवृद्धप्रमातामहयोरपिः आसनंप्रत्येकमुत्सृज्य॥३॥ॐविश्वान्देवान्न
हमावाहयिष्ये॥ॐविश्वेदेवासआगछतश्रृणुतामइमंहवंमेयेअन्त

राम
८

रीक्षेयेउपद्यविष्ठःयेअग्निजिह्वाउतवायेजत्राआसद्यास्मिन्वर्हिषिमाद
यध्वं॥ॐआगछन्तुमहाभागाविश्वेदेवामहाबलाःयेयत्रयोजिताःश्राद्धे
सावधानाभवन्तुते॥ॐयवोसियवयास्मद्द्वेषोयवयारातीः॥इतिविश्वे
देवान्नपात्रोपरियवान्विकीर्य्य॥ॐमातॄन्नान्दीमुखीरहमावाहयिष्ये
ष्ये॥उसन्तस्त्वानिधीमह्युसन्तःसमिधीमहि॥आवहपितॄन्हविषे

0 centimeters 5 10 15 20

आभ्यु
६

अन्वे ॥ ॐ आयन्तु नः पितरः सोम्यासोर ग्निष्वात्ताः पथिभिर्द्देवयानैः ॥ अ
स्मिन्यज्ञे स्वधयामदन्तोधिब्रुवन्तु तेवंत्वस्मान् ॥ इत्यावाहनं कुर्य्यात् ॥
ॐ अपहता असुरा रक्षांसि वेदिषदः ॥ मात्रादि पात्रोपरि यवान्विकीर्य ॥ ततः
गन्धादिदानं ॥ कुशात्रयजवजलांन्यादाय ॥ ॐ अद्य विश्वेदेवाः एतानि ग
न्धपुष्पधूपदीपताम्बूलानि वो नमः ॥ पुनः २ ॥ कुशात्रयजवजलान्यादा

राम
६

य ॥ ॐ अद्यामुकगोत्रे मातरमुकदेवी नान्दीमुखि एतानि गन्धपुष्पधूपदी
पताम्बूलानि तुभ्यं वृद्धिः ॥ एवं पितामही प्रपितामहीभ्यां दद्यात् ॥ ३ ॥ कु
शात्रयजवजलांन्यादाय ॥ ॐ अद्यामुकगोत्र पितरमुकशर्म्मन्नान्दीमु
ख एतानि गन्धपुष्पधूपदीपताम्बूलानि तुभ्यं वृद्धिः ॥ एवं पितामह
प्रपितामहयोरपि दद्यात् ॥ ३ ॥ एवं मातामह प्रमातामह वृद्धप्रमातामहे

0 centimeters 5 10 15 2.0

श्राद्ध·
१०

भ्योपि दद्यात्॥३॥ ततो विश्वेदेव पूर्व्वं पित्रादि पात्रे मण्डलं कृत्वा॥अग्नेः
ग्नौः करणं॥ततः जलपुटकादौ हस्तेनैव· सघृतमन्नं॥ ॐ स्वाहा अग्न
ये कव्य वाहनाय॥ ॐ स्वाहा सोमाय पितृमते॥ ॐ स्वाहा भूः॥ ॐ स्वा
हा भुर्वः॥ ॐ स्वाहा स्वः॥इत्याहुतिं जुयात्॥ किंचिदन्नं तिल घृत मधु
सहितं भूस्वामिने दद्यात्॥ अपसव्यं कृत्वा॥ मोटक तिल जलान्याद

राम
१०

य॥ ॐ इदमन्नमेतत् भूस्वामि पित्रिभ्यो नमः॥ सव्यं कृत्वा· हरिं स्मृत्वा॥
ततो हुतसेषान्नं देव पूर्व्वं पित्रादि पात्रेषु किंचित्किंचि द्दत्वा· ततोन्यद
न्नं यथा सम्भवं· सर्व्वत्र परिविष्य· अन्नोपरि घृत प्रदानं॥ द्वादश पुट
केषु जलं घृतं दत्वा सर्व्वत्र देव पूर्व्वं॥ ततो पनीय पात्रं मालभेत्॥ तत्र क्र
मः॥ उत्तान पाणिभ्यां प्रथमं देव पात्रमालभ्य॥ ॐ पृथिवी ते पात्रं द्यौ



श्राभ्यु· रपिधानं ब्राह्मणस्य मुखे अमृते अमृतं जुहोमि स्वाहा· ॐ इदं विष्णुर्वि
११ चक्रमे त्रेधा निदधे पदं समूढमस्य पांसुले कृष्णहव्यमिदं रक्ष मदीयं
॥ ॐ इदमन्नमित्यन्ने· ॐ इमा आपः इति जले· ॐ इदमाज्यमिति घृते·
ॐ इदं हविः इत्यन्ने ॥ दक्षिणाकराङ्गुष्ठे निवेश्य ॥ ॐ यवोसि यवयास्म
द्वेषो यवयारातिः ॥ इत्यन्नोपरि यवान्विकीर्य· कुशात्रययवजलान्यादा राम·
११



य ॥ ॐ अद्य विश्वेदेवाः इदमन्नं सोपकरणं वो नमः ॥ पुनः २ ॥ एवमेव क्र
मेण मातृपात्रमालभेत् ॥ ॐ पृथिवी ते पात्रं इत्यादि पठनीयं ॥ ततः
कृष्णकव्यमिदं रक्ष मदीयं· शेषं पूर्ववत् ॥ ॐ अपहता ऽसुरा रक्षांसि वे
दिषदः इत्यन्नोपरि यवान्विकीर्य ॥ कुशात्रययवजलान्यादाय ॥ ॐ अ
द्यामुकगोत्रे मातरमुकदेवि नान्दीमुखि इदमन्नं सोपकरणं तुभ्यं वृः

श्रा वृ:
१२

द्धिः॥ एवं पितामहीप्रपितामहीभ्यां दद्यात्॥ एवं पितृपात्रमालभेत्·
यवविकरणपर्यन्तं पूर्ववत्कृत्वा॥ कुशात्रययवजलान्यादाय॥ ॐ
अद्यामुकगोत्र पितरमुकशर्म्मन्नान्दीमुख इदमन्नं सोपकरणंतु·
भ्यं वृद्धिः॥ एवं पितामहप्रपितामहयोरपि॥ एवं मातामहप्रमातामहवृद्धप्रमाता
ताम
हेभ्योपि दद्यात्॥ इत्यन्नोत्सर्गः॥ गायत्रीं त्रिर्जपेत्॥ ततोञ्जलिम्ब
१२

धा॥ ॐ अन्नहीनं क्रियाहीनं विधिहीनं चयद्भवेत्· तत्सर्वमछिद्रमस्तु
॥ इति पठित्वा· गायत्रीं त्रिर्जपित्वा· कुशेषूपविश्य॥ सव्याहृतिकां गा
यत्रीं त्रिर्जपेत्॥ ॐ मधु· मधु मध्विति जपेत्॥ न मधुवाता इत्यृचं·
न पित्र्यमन्त्रान्· न उदीरतान्· पवित्राणि जपेत्॥ ततः कृणुष्व पाज
था
पाठ· ॐ उदीरता इत्यादि जपेत्॥ अन्यानि यशाक्ति सुहृवसूक्तादि जपेत्॥


0 centimeters 5
10
15
20
25
15
10
5

श्राम्बु·
१२

ततःत्रिकुशा भमौ निधाय॥अग्निदग्धामन्त्रमादाय·जलेनप्रोक्षस
यवसैः घृतमन्नं॥मोटकतिलजलांन्यादाय॥ॐअग्निदग्धाश्चयेजीवा
येप्यदग्धाकुलेमम॥भूमौदत्तेनतृप्यंतुतृप्तायांतुपरांगतिं॥इतिमं
त्रेण भूमौ कुशोपरिसजलान्नंविकिरेत्॥ततःआचम्य॥हरिंस्मृ
त्वा·गायत्रींत्रिर्जपित्वा॥ॐमधुमधुमधितिच॥दक्षिणान्दद्यात्॥

राम·
१२

कुशत्रययवजलान्यादाय॥ॐअद्यविश्वेषांदेवानांकृतैतदाभ्युद
यिकश्राद्धप्रतिष्ठार्थमिमेफलमूलेवनस्पतिदैवतेयथानामगो
त्रायश्रींहलराग तद्दक्षिणामहंददे॥एवंपुनः२॥सव्येन·कुशत्रयय·य
वजलान्यादाय॥ॐअद्यामुकगोत्राश्रीमातृरमुकादेव्याः नांदीमु
ख्याःकृतैतदाभ्युदयिकश्राद्धप्रतिष्ठार्थमिमेफलमूलेवनस्पति·


15
10
5
0 centimeters 5
10
15
20

श्राभ्यु॰
१४

दैवते यथानामगोत्राय श्रांह्नरणसदक्षिणामहं ददे ॥ एवं पितामहीप्र
पितामहीभ्यां श्राद्धदक्षिणां दद्यात् ॥३॥ कुशयवसजलान्यादा
य ॥ ॐ अद्यामुकगोत्रस्य पितुरमुकशर्म्मणो नान्दीमुखस्य कृतैतन॰
दाभ्युदयिकश्राद्धप्रतिष्ठार्थमिमे फलमूले वनस्पतिदैवते यथा॰
नामगोत्राय श्रांह्नरणसदक्षिणामहं ददे ॥ एवं पितामहप्रपितामहा

राम॰
१४

दिकर्त्तव्यं ॥३॥ एवं मातामहप्रमातामहवृद्धप्रमातामहेभ्यो दक्षिणां दद्या
त् ॥३॥ ॐ देवताभ्यः पितृभ्यश्च महायोगिभ्य एव च । नमः स्वधायै स्वा
हायै नित्यमेव भवन्त्विति ॥ इति विसर्ज्जयेत् ॥ ततो दीपं निर्वाप्य हस्तौ
पादौ प्रक्षाल्याचम्य हरिं स्मृत्वा ॥ ॐ प्रमादात् कुर्वतां कर्म प्रच्यवे
ताध्वरेषु यत् । स्मरणादेव तद्विष्णोः संपूर्णं स्यादिति श्रुतिः ॥ ॥

श्रा भु.
१५

ॐ कयानेतिमहावै वामदेवऋषिर्गायत्रीछन्दः ईन्द्रो देवताग्नि
ष्टोमादौ द्वितीयपृष्ठाग्निकर्मनि च जपे विनियोगः॥ ॐ कयानश्चि
त्र आभुवदूती सदावृद्ध सखा कयाः शचिष्ठया वृता कस्त्वा सत्योम
दानांमहिष्ठो मत्सदंधसः दृढा चीदारुजे वसु आभि षु नः॥ सखी
नाम पिता जरितॄणां शतं भवास्युतये॥ ॐ स्वस्तिन ईन्द्रो वृद्धश्रवा

राम.
१५



आभ्यु
१६

वाँ स्वस्तिनः पूषा विश्ववेदाः स्वस्ति नस्तार्क्ष्यो अरिष्टनेमिः स्वस्ति नो बृ
हस्पतिर्दधातु ॥ ॐ प्राजापत्यं वै वामदेव्यं प्रजापतावेव प्रतिष्ठापोति
यंतु ॥ पशवो वै वामदेव्यं पशुष्वेव प्रतिष्ठापोति यंतु ॥ शान्तिर्वै वाम
देव्यं शान्तावेव प्रतिष्ठापोति यंतु ॥ अतः एतत्कर्माच्छिद्रमस्तु ॥ इति
वामदेवगानं ॥ इति छन्दोगानां आभ्युदईकप्रयोगः ॥ ॥१६॥ राम
ततः ब्राह्मणाय श्राद्धदक्षं प्रतिपादयेत् ॥ १६

यसा॰
१

अथ पूग यज्ञोपवीतदानविधिः॥ तत्र कन्यापिता पश्चिमाभिमुखो भू
त्वा॰ पुष्पचन्दनसहितेन पूग यज्ञोपवीन वस्त्रान्यादाय॰ ॐ तस्मिन्काले
अग्निसान्निध्ये स्नातः स्नाने ह्यरोगिनि॥ अयं गे अपतिते स्फीते पि
तानुभ्यं प्रदास्यामि॥ इति पठित्वा॰ श्री अमुकी देवी॰ इति पूग यज्ञोप॰
वीतं वराय दत्वा॥ ततो वरः पठति॥ ॐ ऋतनवस्य ऋतावृधः ऋतन

राम
१७

स्थास्य ऋतावृधः॥ घृतश्चुतो मधुश्चुतो विराजो नाम कामदुघा अक्षी
यमाणाः॥ इति पठित्वा वरः शिरसि अक्षतादिकं दत्वा॰ यज्ञोपवीतं परि
दधाति॥ ॥अथाष्टमंगल पठनीयं॥ ॐ आशुः शिशानो वृषभो न
भीमो॰ घनाघनक्षोभनश्चर्षणीनां॥ संक्रंदनोनिमिष एकवीरः श
तं सेना अजयत्साकमिन्द्रः॥ संक्रंदनेनानिमिषेण जिष्णुना युत्कारेण



वरसा.
२

दुश्च्यवनेनधृष्णुना॥तदिंद्रेणाजयततत्सहध्वंयुधोनरईषुहस्तेनवृ
ष्णा॥सईषुहस्तैःसनिषंगिभिर्वशीसँस्रष्टासयुधइंद्रोगणेन॥
सँसृष्टजित्सोमपाबाहुशर्ध्युग्रधन्वाप्रतिहिताभिरस्ता॥बृहस्पते
परिदीयारथेनरक्षोहामित्राँ॥अपबाधमानःप्रभंजन्सेनाःप्रमृणो
युधाजयन्नस्माकमेध्यवितारथानां॥४॥बलविज्ञायस्थविरःप्र

राम.
१८



वीरःसहस्वान्वाजीसहमानउग्रः॥अभिवीरोअभिसत्वासहोजाजै
त्रमिंद्ररथमातिष्ठगोवित्॥गोत्रभिदंगोविदंवज्रबाहुंजयंतमज्म
प्रमृणंतमोजसा॥इमंसजाताअनुवीरयध्वमिंद्रंसखायोअनु
सँरभध्वं॥अभिगोत्राणिसहसागाहमानोदयोवीरःशतमन्युरिंद्रः॥
दुश्च्यवनःपृतनाषाडयुध्योस्माकंसेनाअवतुप्रयुत्सु॥इंद्रआसांने

centimeters 5
10
15
20
15
10
5

ऋग्मं
२

नाबृहस्पतिर्दक्षिणा यज्ञः पुर एतु सोमः ॥ देवसेनानामभिभंजती
नां जयंतीनां मरुतो यंत्वग्रं ॥ इंद्रस्य वृष्णो वरुणस्य राज्ञ आदि
त्यानां मरुतां शर्द्ध उग्रं ॥ महामनसां भुवनच्यवानां घोषो देवानां जय
तामुदस्थात् ॥ उद्धर्षय मघवन्नायुधान्युत्सत्वानां मामकानां मनां
सि ॥ उद्वृत्रहन्वाजिनां वाजिनान्युद्रथानां जयतां यंतु घोषाः ॥१०॥

राम
१९

अस्माकमिंद्रः समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयंतु ॥ अस्मा
कं वीरा उत्तरे भवंत्वस्मा ॥ उ देवा अवता हवेषु ॥ अमीषां चित्तं प्र
तिलोभयंती गृहाणांगान्यप्वे परेहि ॥ अभि प्रेहि निर्दह हृत्सु
शोकैरंधेनामित्रास्तमसा सचंतां ॥ अवसृष्टा परा पत शरव्ये ब्रह्म
संशिते गच्छामित्रान्प्रपद्यस्व मामीषां कंचनोच्छिषः ॥ प्रेता जयता

क्षा



यजुसं.
४

नरइन्द्रोवःशर्म्मयछतु ॥ उग्रावःसंतुबाहवोंनाधृष्यायथासथ ॥
असौयासेनामरुतःपरेषांमभ्येतिनओजसास्पर्द्धमानो ॥ तांगूह
तमसांपव्रतेनयथामीअन्योअन्यंनजानन ॥ यत्रबाणाःसंपतं
तिकुमाराविशिखाइव ॥ तन्नइन्द्रोबृहस्पतिरदितिःशर्म्मयछ
तुविश्वाहाशर्म्मयछतु ॥ मर्म्माणितेवर्म्मणाछादयामिसोमस्त्वा

राम.
२०

राजामृतेनानुवस्तांउरोर्वरीयोवरुणस्तेकृणोतुजयंत्वानुदेवाम
दंतु ॥ ॥ ॐ शहस्रशीर्षापठित्वा ॥ ॐ सहस्रशीर्षापुरुषःसहस्रा
क्षसहस्रपात् ॥ सभूमिंसर्वतःस्पृत्वात्यतिष्ठद्दशांगुलं ॥ पुरुषए
वेदंसर्वंयद्भूतंयच्चभाव्यं ॥ उतामृतत्वस्येशानोयदन्नेनातिरोह
ति ॥ एतावानस्यमहिमातोज्यायांश्चपुरुषः ॥ पादोस्यविश्वाभू
य

अष्टमं.
२

तानित्रिपादस्यामृतंदिवि ॥ त्रिपादूर्ध्वउदैत्पुरुषःपादोस्येहाभव
त्पुनः ॥ ततोविष्वंव्यक्रामत्साशनानशनेअभि ॥ ततोविराडजा
यतविराजोअधिपूरुषः ॥ सजातोअत्यरिच्यतपश्चाद्भूमिमथोः
पुरः ॥ तस्माद्यज्ञात्सर्वहुतःसंभृतंपृषदाज्यं ॥ पशूंस्तांश्चक्रेवा
यव्यानारण्याग्राम्याश्चये ॥ तस्माद्यज्ञात्सर्वहुतऋचःसामानि

राम.
२१

जज्ञिरे ॥ छन्दांसिजज्ञिरेतस्माद्यजुस्तस्मादजायत ॥ तस्मादश्वा
अजायन्तयेकेचोभयादतः ॥ गावोहजज्ञिरेतस्मात्तस्माज्जाताअजा
वयः ॥ तंयज्ञंबर्हिषिप्रौक्षन्पुरुषंजातमग्रतः ॥ तेनदेवाअयजन्तसा
ध्याऋषयश्चये ॥ यत्पुरुषंव्यदधुःकतिधाव्यकल्पयन् ॥ मुखंकि
मस्यासीत्किंबाहूकिमूरूपादाउच्यते ॥ ब्राह्मणोस्यमुखमासीद्बा


15
10
5
0 centimeters 5
10
15
20

श्रु.सं.
६

हूराजन्यः कृतः। ऊरु तदस्य यद्वैश्यः पद्भ्यां शूद्रो अजायत॥ चन्द्रमा म
नसोजातश्चक्षोः सूर्यो अजायत॥ श्रोत्राद्वायुश्च प्राणश्च मुखा
दग्निरजायत॥ नाभ्या आसीदन्तरिक्षं शीर्ष्णो द्यौः समवर्तत॥
पद्भ्यां भूमिर्दिशः श्रोत्रात्तथा लोकाँ अकल्पयन्॥ यत्पुरुषेण
हविषा देवा यज्ञमतन्वत॥ वसन्तोस्यासीदाज्यं ग्रीष्म इध्मः शरद्ध

राम.
२२

विः॥ सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः॥ देवा यद्यज्ञं तन्वा
ना अबध्नन्पुरुषं पशुं॥ यज्ञेन यज्ञमयजन्त देवास्तानि धर्माणि प्र
थमान्यासन्॥ ते ह नाकं महिमानः सचन्त यत्र पूर्वे साध्याः सन्ति देवाः॥
१६॥

15
10
5
0 centimeters 5
10
15
20

मह श्रः
७

राम:
२३

वीवाः
१

१ॐ नमः श्रीगणेशाय॥ ॥देवादित्यकुले जातः ख्यातस्त्रैलोक्यसंस
दि। पद्धतिं विदधे धीमान्· श्रीमान् वीरेश्वरः सुधीः॥ यस्य मंत्रस्य
यत्रैवः विनियोगा प्रभातधं। विलिलेख सतत्रैवः प्रतिकर्म्मकुश
लिडकां॥ तत्रादौ विवाहः॥ जामातृं मातृका पूजाभ्युदयिकं कर्तव्यं
॥ततः कंन्याप्रदः कृतमात्रिका पूजा पर्यंकवद्विःश्राद्धः मण्डपो घरे रामः

गोबन्धनं कारयित्वा· अंञ्जलिं विधाय· प्रत्यङ्मुखस्तिष्ठन्तामेव
गामुपतिष्ठेदनेन कंन्याप्रदः॥ प्रजापतिऋषिरनुष्टुप्छन्दोर्हणी
योगो हेवता गोपरूपस्याने विनियोगः॥ ॐ अर्हणा पुत्रवाससाधे
नुरभवद्यमे सा नः पयः स्वती डुहाउत्तरामुत्तरांसमां· इति मन्त्रेण॥
ततः उपविश्य दर्हणीयो जपेत्· प्रजापतिऋषिर्विराड्गायत्री छन्द


15
10
5
0 centimeters 5
10
15
20

वीवाः आसनन्देवताउपविशदर्हणीयोजपेविनियोगः ॥ ॐ इदमहमि
२ मांपाद्यांविराजमन्नाद्यायाधितिष्ठामि· इति· ततः प्राङ्मुखोऽर्हणी
यउपविशेत् ॥ प्रत्यङ्मुखश्च दाताविष्टरमेकंगृहीत्वा ॥ ॐ विष्ट
रोविष्टरोविष्टर इतिविरम्मैन्निवेदिने ॥ ॐ विष्टरः प्रतिगृह्यतामि
ति· यजमानेनोक्ते· ॐ विष्टरं प्रतिगृह्णामीति वरः प्रति·गृह्य ॥ उत्तरा एम·

ग्रेविष्टरेउपविशेदनेनमंत्रेण· प्रजापतिऋषिरनुष्टुप्छन्द ओषध्यो
देवताविष्टरस्यासनदानेविनियोगः ॥ ॐ या ओषधीः सोमराज्ञीर्बह्वीः
शतविचक्षणाःतामह्यमास्मिन्नासनेच्छिद्राः शर्म्म यच्छन्तु ॥ इत्युत्त
राग्रं पञ्चविंशतिकुशपत्रकं विष्टरमासनंदद्यात् ॥ ततः पूर्ववन्निवे
दितमपरविष्टरंगृहीत्वा· प्रजापतिऋषिरनुष्टुप्छन्द ओषध्योदे

वीवा
२

वता विष्टरस्य पादयोरधस्ताद्दाने विनियोगः ॥ ॐ या ओषधीः सोमरा
ज्ञीर्विष्ठिताः पृथिवीमनु । तामस्यामस्मिन् पादयोस्तिष्ठताः शर्म्मय
छतु इति पादयोरधस्ताद्भताग्रं विष्टरं ददातु ॥ ततो भाजनस्याग्रा
पउपनीय ॥ ॐ पाद्यः पाद्यः पाद्यइति त्रिरन्यैर्निवेदिते ॐ पाद्यः
प्रतिगृह्णंतामिति यजमानेनोक्ते ॥ ॐ पाद्यः प्रतिगृह्णामित्युक्त्वा व राम

रः प्रजापतिर्ऋषिर्विराड्गायत्री छन्दः आपो देवता पादप्रक्षालनोदकप्र
दाने विनियोगः ॥ ॐ यतो देवीः प्रतिपश्याम्यापस्ततो माराधिरागच्छतु
॥ इति यजमानाञ्जलिस्था आपः प्रक्षेपेत् ॥ ततस्तास्योरञ्जलिं गृही
त्वा सव्यं पादप्रक्षालयेदनेन मंत्रेण प्रजापतिर्ऋषिर्विराड्गाय
त्री छन्दः श्रीर्देवता सव्यपादप्रक्षालने विनियोगः ॥ ॐ सव्यं पादम

पा·पा·
४

वतो निजे स्मिन्वा छु श्रियं दधे· इति वाम पादं प्रक्षालयति वरः॥ततः
पुनरञ्जलिं गृहीत्वा· दक्षिणं पादं प्रक्षालयेदनेन मंत्रेण· प्रजापति
ऋषिर्विराड्गायत्री छन्दः श्रीर्देवता दक्षिण पादप्रक्षालने विनियो
गः॥ ॐ दक्षिणं पादमवने निजेजेऽस्मिन्रा छु श्रियमावेशयामि·
इति दक्षिणपादं प्रक्षालयति॥ततः पुनउदकाञ्जलिं गृहीत्वा·पा राम·

दौ प्रक्षालयेदनेन मंत्रेण· प्रजापतिऋषिर्विराड्गायत्री छन्दः श्रीर्देवतो
उभय पाद प्रक्षालने विनियोगः॥ ॐ पूर्वमन्यमपरमन्यमुभौ पादावने·
निजेस्मिन्वा छुस्य र्ध्यौ ऽभय स्यावरुद्धौ· इत्युभौ पादौ संहतौ कृत्य
प्रक्षालयेत्॥ ततो दूर्वाक्षत फल चन्दन पुष्पार्घपात्रं शिरसे गृहीत्वा·
ॐ अर्घोमर्घोमर्घ्यामिति त्रिरन्यै स्मृते· ॐ अर्घः प्रतिगृह्यतामिति

0 centimeters 5 10 15 20



वी वा.
५

यजमानेनोक्ते· ॐ अर्घ्यं प्रतिगृह्णामीत्युक्त्वा वरः॥ प्रजापतिरृ
षिरेकपादिराड्गायत्री छन्दोअर्घ्यं देवतार्घ्यप्रतिग्रहणे विनि·
योगः॥ ॐ अन्नस्य राष्ट्रिरसि राष्ट्रिस्ते भूयासं इत्यर्घ्यमादाय· लो
कं जलं शिरसि निदध्यात्॥ ततः आचमनार्थमुदकमानीय· ॐ
आचमनीयं आचमनीयं आचमनीयं इत्यन्यैरुक्ते· ॐ आचम

राम·



नीयं प्रतिगृह्यतामिति यजमानेनोक्ते· ॐ आचमनीयं प्रतिगृह्णामी
ति वरः प्रतिगृह्य॥ प्रजापतिरृषिरेकपाद्गायत्री छन्दः आचमनी
यं देवता आचमनीयाचमने विनियोगः॥ ॐ यशोसि यशोमयि
निधेहि इत्याचमनं कुर्यात्॥ ततो दधिमधुघृतं कांस्यपात्रस्थं·
कांस्यपात्रान्तरेणाच्छादितं· मधुपर्कं गृहीत्वा· ॐ मधुपर्कोम

0 centimeters 5
10
15
20
25



वी·वा·
६

धुपर्को मधुपर्कं इति त्रिरन्यै रुक्ते· ॐ मधुपर्कः प्रतिगृह्यतामिति य
जमानेनोक्ते· ॐ मधुपर्कं प्रतिगृह्णामीत्युक्त्वा वरः प्रतिगृह्णीयादनेन
मंत्रेण· प्रजापतिरृषिर्गायत्री छन्दो मधुपर्को देवता मधुपर्कग्रह
णे विनियोगः ॐ यशसो यशोसि· इत्यनेन मधुपर्कं गृहीत्वा· वामह
स्ते निधाय अनामिकाङ्गुष्ठाभ्यां मधुपर्कं· त्रिर्भक्षयेदनेन मंत्रेण·

राम·

प्रजापतिरृषिर्गायत्री छन्दो मधुपर्को देवता मधुपर्कप्राशने विनि
योगः॥ ॐ यशसो भक्षोसि· महसो भक्षोसि· श्री भक्षोसि· श्रियं मयि
धेहि· अनेन वारत्रयं मधुपर्कं भक्षयेत्· प्रतिप्राशने मंत्र पाठः॥ चतु
र्थं तु क्षौं· ततो मधुपर्कशेषमसंचरदेशे स्थापयेत्· ततः आचम्य· वेदि
ष्ट्वा· वेद्यां चतुरङ्गुलोच्छ्रितायां वालुकामय्यां· उपवेश्यः कुश प्र



वीवाः
७

छादिनसुदकमानेनव्यं· तत्र· पूर्वोत्तरप्रवो देशः समो वा कुशैः परि
सोध्य· गोमयोदकेनोपलिप्य· प्राङ्मुख उपविष्टः॥ प्राङ्मुखः फलपु
ष्पकुशानामन्यतमं गृहीत्वा· अग्निस्थापनपर्यन्तं वामहस्तं भूमावा
रोप्य· दक्षिणजानुं भूमावेव पातयित्वा· रेखापंचकं कुर्यात्॥
तत्र प्रथमं पूर्वाग्रा द्वादशाङ्गुलप्रमाणा पृथिवीदेवकाध्येय पीत

रामः



वर्णा लेखा लिखितव्या॥ तल्लेखा पश्चिमभागसंलग्ना उत्तराग्रा ए
विंशत्यङ्गुलप्रमाणा· अग्निदेवताकाध्येय लोहितवर्णा लेखा लिखि
तव्या॥ तल्लेखासंलग्ना पूर्वाग्रलेखातः षडङ्गुलान्तराला पूर्वगामि
नी· प्रादेशप्रमाणा· प्रजापतिदेवताकाध्येय कृष्णवर्णा लेखा लिखि
तव्या॥ तस्या अपि षडङ्गुलान्तराला पूर्वगामिनी प्रादेशप्रमाणा· इन्द्र

वीवा देवताकाध्येयः नीलवर्णलेखालिखितव्या ।। तस्या अपि षडङ्गुला
८ न्तरालापूर्वगामिनी द्वादशाङ्गुलप्रमाणा सोमदेवताकाध्येयः शुक्ल
वर्णालेखालिखितव्या ।। एवं लेखापञ्चकं कृत्वा ।। अनामिकाङ्गुष्ठा
भ्यां ताभ्य एव मृदः खनित्वा ऐशान्यां क्षिपेत् ।। ततो जलेन लेखाः
भ्युक्षणं कृत्वा सन्निधापितकांस्यपात्रस्थेनोज्वलत्तृणाग्निरस्यत्य राम

नेन ।। प्रजापतिऋषिस्त्रिष्टुप्छन्दोऽग्निर्देवता अग्निसंस्कारे वि
नियोगः ।। ॐ क्रव्यादमग्निं प्रहिणोमि दूरं यमराज्यं गच्छतु रिप्रवाहः
इति ।। ततोऽग्निं प्रणयेदनेन ।। प्रजापतिऋषिर्बृहतीछन्दो बृहस्प
तिर्देवता अग्निस्थापने विनियोगः ।। ॐ भूर्भुवः स्वः इत्यभिमुखम
ग्निं प्रणयेत् ।। ततो वामहस्तं जानुनोत्थाप्य ।। अञ्जलिं बध्वा ।। ॐ



वी वा.
६

इहैवाय़मितरो जातवेदा देवेभ्यो हव्यं वहतु प्रजानन्. इत्यग्नेरुपस्थानं
॥ ततो य़ोजकनामानमग्निमुपसमाधाय़॥ पातितदक्षिणजानुः प्रा
देशमितां समिधं घृताक्तां तूष्णीमग्नौ क्षिपेत्॥ अथाग्नेरुत्तरदिश्यु
पविश्य. ब्रह्मवरणं. ॐ अद्य मत्कर्त्तव्य पाणिग्रहण होम कर्म्मणि
कृताकृतावेक्षणरूप ब्रह्मकर्म्म कर्त्तुमेभिः पुष्पचन्दनताम्बूल.

राम.



वासोभिरमुकगोत्रममुकशर्म्माणं. ब्राह्मणं ब्रह्मत्वे. नत्वामहं वृणे॥
॥ॐ वृतोस्मीति प्रतिवचनं॥ ॐ यथाविहितं कर्म्म कुरु: इति यज.
मानेनोक्ते। ॐ करवाणीति प्रतिवचनं॥ ततोग्रेणाग्निं परिक्रम्या
ग्नेर्दक्षिणतः स्थित्वा. ब्रह्मासने प्राङ्मुखीं वारिधारां दद्यात्. तस्या उ
परि पूर्वाग्रान् कुशानास्तीर्य. अथ प्रत्यङ्मुखवास्तिष्ठन्॥ वामहस्ता


0 centimeters 5
10
15
20

वीवा·
१०

कुष्ठानामिकाभ्यां ब्रंह्मासनाद्दर्भमेकं गृहीत्वा· नैऋत्यां क्षिपेदनेन
मंत्रेण· प्रजापतिऋषिर्गायत्रीछन्दोऽग्निर्दैवता ब्रह्मासनात्तृण
निरसने विनियोगः॥ ॐ निरस्तः परावसुः इति तृणं निरस्य उदकमु
पस्पृश्य· ब्रह्मोपवेशयेदनेन मंत्रेण॥ प्रजापतिऋषिरनुष्टुप्छन्दोऽ
ग्निर्दैवता ब्रह्मोपवेशने विनियोगः॥ ॐ आवसोः सदने सीद इति ब्र

रामः

ह्माणमुपवेशयेत्॥ ततो ब्रह्मोपरि कुशान्दत्वा॥ अब्राह्मणपक्षे· य
दि छत्रम्वोऽकं· कमण्डलुम्वो भरम्वा सङ्कल्प्याऽद्धिन्यायाण· भर्गर्भि
पञ्चाशत्कुशपत्रनिर्म्मितं दक्षिणावर्त· ग्रन्थियुतं दर्भबटुक
म्वा· ब्रह्माणं कुर्यात्· तदावर्ण प्रतिवर्ज्जं· सर्वं स्वयमेव यजमानः
कुर्यात्· ब्रह्मोपवेशनमन्त्रे सीदेत्पुरुः ब्रह्मयघ यज्ञियाम्या चंव

वीवा·
११

देभदा॥ जले नाभ्युक्ष्य ब्रह्माणं स्पृष्ट्वा जपेत्॥ प्रजापतिरृषी
र्गायत्री छन्दो विष्णुर्देवता जपे विनियोगः॥ ॐ इदं विष्णुर्विच
क्रमे त्रेधा निदधे पदं। समूढमस्य पांसुले· इति जपेत्॥ ॐ नमो वि
ष्णवे इति वा वदेत्॥ कुशबटुकादिपक्षे· तं स्पृष्ट्वा· यजमान एवे
दं जप्त्वा नेनैव पथा परावृत्य स्वस्थानं गछेत्॥ ततः दक्षिणादिशि

राम·

शांतनसर्वाङ्ग उदक· कलसधारी बह्वृचः कश्चि उदङ्मुखोपतिष्ठेत्· ला
जोभारण्डशीलापहृकं च· होमोपकरणद्रव्याणि स्थापयेत्· ततो व
रः कौतुकागारात् कंन्यां हस्ते गृहीत्वा· मण्डपमागत्य· पूर्वाभिमुख
उपविस्यतां तथैवोपवेशयेत्॥ इदानीं वस्त्रपरिधानमित्यपस्य· शा
खीयं॥ ततः आचम्य· कंन्याप्रदः प्राङ्मुखः कंन्यादानमारभेत्॥

0 centimeters 5 10 15 20

वी.वा. शंखस्य दुर्वाक्षतफलतिलजलान्यादाय· जामातृ दक्षिणक
१२ रोपरि कंन्या दक्षिणकरं निधाय· तदुपरि· दाताकर॥ ॥ॐ अ
द्यामुकमासीयामुकपक्षीयामुकतिथौ· अमुकगोत्रस्यामुकप्र
वरस्यामुकशर्म्मणः प्रपौत्राय॥ अमुकगोत्रस्या· मुकप्रवरस्यामुक
शर्म्मणः पौत्राय॥ अमुकगोत्रस्यामुकप्रवरस्यामुकशर्म्मणः राम·

पुत्राय॥३॥ अमुकगोत्रस्यामुकप्रवरस्यामुकशर्म्मणः प्रपौत्रीं॥
अमुकगोत्रस्यामुकप्रवरस्यामुकशर्म्मणः पौत्रीं॥ अमुकगोत्र
स्यामुकप्रवरस्यामुकशर्म्मणः पुत्रीं॥३॥ एवं त्रिरुच्चार्य्य॥ अ
मुकगोत्रायामुकप्रवरायामुकशर्म्मणे श्रीं [illegible] प्रवराय तुभ्यं
अमुकगोत्रामुकप्रवरामुकदेवीनाम्नीमिमां कंन्यां सालंका



वीवा·
१३

तं प्रजापतिदैवतां स्वर्गकामः पत्नीत्वेनाहं संप्रददे इति दद्यात्।।
ततो वरः स्वस्तीति वदेत्।। ततः कन्याप्रदः।। ॐ अद्येह कृतैतत्कन्यादा
नप्रतिष्ठार्थमिदं सुवर्णमग्निदैवतं अमुकगोत्रायामुकप्रवरा-
यामुकशर्म्मणे ब्राह्मणाय वराय दक्षिणां तुभ्यमहं संप्रददे।। ततः
ॐ स्वस्तीति वरो वदेत्· गोमिथुनं वा तच्च रुद्रदैवतं दक्षिणां दद्यात्।।

राम·

ततो वरः स्वस्तीत्युक्त्वा।। ॐ क इदं कस्मा अदात्कामः कामायादात्।
कामो दाता कामः प्रतिग्रहीता कामः समुद्रमाविशत्। कामेन त्वा
प्रतिगृह्णामि कामैतत्ते· इति पठति।। ततो नापितो· गौर्गौर्गौरिति व
देत्।। ततो हस्ती सो नापितं भुञ्जात्· प्रजापतेर्ऋषिर्बृहतीछन्दो गो
देवता पशुबन्धगोविमोक्षणे विनियोगः।। ॐ मुञ्च गां वरुणपाशा

वीवा.
१४

द्विषन्तं म्मोऽभिधेहि। तं जह्यमुष्य चोभयोरुत्सृज गामत्तु तृणानि पि
बतूदकं।। ततो नापितनेन गाविमुक्त्वा सां· अर्हणीय एव गामनुमंत्र
येत्।। अनेन मंत्रेण प्रजापतिऋषिस्त्रिष्टुप्छंदो गौर्देवता गोरनु
मंत्रणे विनियोगः।। ॐ माता रुद्राणां दुहिता वसूनां स्वसादित्या
नाममृतस्य नाभिः।। प्रनु वोचं चिकितुषे जनाय मा गामना·

राम.

गामदितिं वधिष्ट।। मम चामुष्य चाश्री अमुकशर्म्मणो यजमान
स्य पाप्मा हत।। ॐ उत्सृजत तृणान्यत्तु· इति तृणांछि·धातु।। ततो वरः
सभाचाराद्दैव· वधूं वासो युग्मं परिधापयेदनेन· प्रजापतिऋषि
र्जगती छन्दो वस्त्रनिध्यादयो देवता अधरीयवस्त्रपरिधाने
जपे विनियोगः।। ॐ या अकृन्तन्नवयं या अतन्वत याश्च देवीस्त
न्तौ

वीवा·
१२

ग्ने नभिनो ननन्ध्व । तास्त्वा देवी ऊर्जरसि संव्यय· स्वायुष्मतीदं परिध
त्स्वा वासः ।। प्रजापतिर्ऋषिस्त्रिष्टुप्छन्दः परिधातातो देवता उत्तरीय
वस्त्र परिधाने विनियोगः ।। ॐ परिधत्त धत्त वाससैनां शतायुषी कृ·
णुत दीर्घमायुः शतं च जीव शरदः स्वर्चीवस्तू नि चार्ये विभजासि
जीवन् । ततो वरोपि नूत्नीं वस्त्र युगं परिधाय ।। ततः उभयो दि

राम·

राचमनं ।। अथ यजमानो दुर्वाक्षतफलपुष्पं वरवधूवस्त्राभ्यां अन्य
ग्रंथिं पातये· अनेन मंत्रेण ।। तत्र वरः मंत्रं पठति· प्रजापतिर्ऋषि·
स्त्रिष्टुप्छन्दो विश्वेदेवाः देवता सम्मातरिश्व संधानं समुदेष्ट्या दे
वता अन्यग्रंथिबंधने विनियोगः ।। ॐ समंजंतु विश्वे देवाः समा
पो हृदयानि नौ। सम्मातरिश्वा संधाता· समुदेष्ट्री दधातु नौ ।। मंत्र



0 centimeters 5
10
15
20
15
10
5

वीवा.
१६

पाठयाये वरकर्तृकः विन्यास विदो यजतिं वधूं वेदीं नयन् मंत्रं
पठेत्॥ प्रजापतिर्ऋषिरनुष्टुप्छन्दः सोमो देवता पत्न्युः कन्यानयने
जपे विनियोगः॥ ॐ सोमो ददद्गन्धर्वाय गन्धर्वो दददग्नये। रयिं च
पुत्रांश्चादादग्निर्मह्यमथो इमां॥ अथाग्नेः पश्चात् पादेन कटं प्रे
रयन्तीं वधूं पतिः पाठयेत्॥ प्रजापतिर्ऋषिर्हि पाज्जगती छन्दः पति

राम.

ईवनाकटे पादप्रवर्तने विनियोगः॥ ॐ प्रमे पतियानः पंथाः कल्प
तां शिवा अरिष्टा पतिलोकं गमेयं॥ यदि वधूर्न पठति तदा वरः स्व
यमेव पठेत्॥ ततः प्रजापतिर्ऋषिर्हि पाज्जगती छन्दः पति ईव
ता कटं पादप्रवर्तने विनियोगः॥ ॐ प्रास्याः पतियानः पन्थाः कल्प
तां शिवा अरिष्टा पतिलोकं गम्याः॥ ततः पूर्वस्मिन् कटके भागे



वीवा·
७

पाणिग्रहस्य. ततः वरः उपविश्य. पत्निः दक्षिणतः च ध्रुवं उपविश्य॥
वर उपविशति. वरः कुशकण्डिकां कुर्यात्॥ दक्षिणजानुं पातयि
त्वा. उपरीकृत दक्षिणहस्तः करद्वयमधोमुखं भूमावारोप्य भू
मिजपं कुर्यात्॥ परमेष्ठी ऋषिः ऋग्वेदश्छन्दोऽग्निर्देवता भूमिजपे
विनियोगः॥ ॐ इदं भूमे र्भजामहे इदं भद्रं सुमङ्गलं. परासप
मे
त्न·



त्ना बाधस्वान्येषां विन्दते धनं॥ शचौ धनस्थाने वस्त्र स द सुच्चारयेत्॥ ततो द
क्षिणहस्तेन कुशत्रयं गृहीत्वा. परिसमूहयेत्॥ कौत्स ऋषिर्जगती छन्दो
ग्निर्देवता वृ वस्य षद हस्य षडे अहन्यग्निमारुते शाले परिसमूहने वि
नियोगः॥ ॐ इमं स्तोममर्हते जातवेदसे रथमिव सम्महेमा मनीषया भद्रा
हि नः। प्रमतिरस्य संसद्यग्ने सख्ये मा रिषामा वयं तव. इत्यग्ने दूभर गः॥ ॐ

0 centimeters 5 10 15 20



वीवा· भरामेध्मं कृणवामा हवींषि ते चितयन्तः पर्व्वणा वयं। जीवातवे प्रत
१८ रं साधया धियोग्नेः सख्ये मारिषामा वयन्तव· इति पूर्वतः॥ ॐ शके
म त्वा समिधं साधया धियस्त्वे देवा हविरदन्त्याहुतं। त्वमादित्यां
आवह तां ह्युश्मस्यग्ने सख्ये मारिषामा वयन्तव· इति दक्षिणतः॥
इति परिसमुह्य· त्रिरावृत्तं पंचावृत्तं वा· अग्नेर्मेखलान्पा द्वादशपत्र प्रा राम·

गग्रैः कुशैः स्तरणं कुर्य्यात्· पुरस्तात् दक्षिणत उत्तरतः पश्चात्· परिस्तर
णं कुर्य्यात्॥ अथ द्विप्रादेशमितं विंशतिध्मान् मूलमध्याग्रक्रमेण
घृताक्तान्· एकाग्रान् प्रजापतिं मनसा ध्यात्वा तूष्णीमग्नौ जुहुयात्॥
ततस्तु तादेव बर्हिषैः साग्रकुशपत्रद्वयं· प्रादेशमात्रं कृत्वा· कुशमन्तर्द्धाय छिं
द्यादनेन मंत्रेण॥ प्रजापतिऋषि रुष्णिक्छन्दः पवित्रे देवते पवित्रछेद

वीवा. नेविनियोगः॥ ॐ पवित्रे स्थो वैष्णव्यौ· ततोद्भिरनुमृज्यादनेनम
१९ न्त्रेण॥ प्रजापतिऋषि उष्णिकछन्दः पवित्रे देवते पवित्रसम्मार्ज
नेविनियोगः॥ ॐ विष्णोर्म्मनसापूते स्थः इति संमृज्याज्यस्थाल्या
मुदग्रे पवित्रे निधायाज्यमावपेत्॥ ततो सव्यहस्ताङ्गुष्ठोपकनि
ष्ठाभ्यां· गृहीतपवित्राभ्यामाज्यमूर्द्ध्वं त्रीन्वारान्सकृदुत्क्षिपेदनेन॥ रामः·

प्रजापतिऋषिर्गायत्री छन्दः आज्यं देवता· आज्योत्पवने विनियो
गः॥ ॐ देवस्त्वा सवितोत्पुनात्वछिद्रेण पवित्रेण वसोः सूर्य्यस्य र
श्मिभिः स्वाहा॥ इति स्रुच्चौ· ततः पवित्रे जलेनाभ्युक्ष्य वह्नौं मग्रौक्षि
पेत्॥ ततः आज्यपात्रमुदकेनानुमृज्याग्नेरुपरि निधायाग्रेरुभर
तो वारत्रयमवतारयेत्· इत्याज्यसंस्कारः॥ ततः स्रुवं कुशेन संमृज्य·


15
10
5
0 centimeters 5
10
15
20

विवा·
२०

जलेनाभ्युक्ष्य· त्रिरग्नौ प्रतप्यावतारयेत् ।। इति श्रुवसंस्कारः ।। ।।त
तोऽभ्यागत दक्षिणजानुः उदकस्थाली मध्ये निधाय ।। प्रजापतिऋ
षिर्गायत्री छन्दोऽदितिर्देवतोदकाञ्जलिप्रशेचने विनियोगः ।। ॐ
ऽदितेऽनुमन्यस्व· इत्यग्ने दक्षिणतः पूर्वाग्रामञ्जलिधारान्दद्यात्
।। प्रजापतिऋषिरनुमतिर्देवतोदकाञ्जलिप्रसेचने विनियोगः ।।

राम·

ॐ अनुमतेऽनुमन्यस्व· इति पश्चादुत्तराग्रां ।। प्रजापतिऋषिः सरस्व
ती देवतोदकाञ्जलिप्रसेचने विनियोगः ।। ॐ सरस्वत्यनुमन्यस्व· इत्य
ग्नेरुत्तरतः पूर्वाग्रान्दद्यात् ।। प्रजापतिऋषिस्त्रिष्टुप्छन्दः सविता दे
वताग्निपर्युक्षणे विनियोगः ।। ॐ देव सवितः प्रसुव यज्ञं प्रसुव यज्ञ
पतिं भगाय । दिव्यो गन्धर्वः केतपूः केतन्नः पुनातु वाचस्पतिर्वाचन्नः

विवा·
२१

स्वदन्तु· इति होमी पूर्व्व सहितस्याग्ने र्वारिधारा प्रावेशनं कुर्य्यात् ।। अ
नोजानुस्थाप्य· सामिधमेकां फल पुष्प कुश सहितां गृहीत्वा· उपरी
कृत दक्षिण हस्तो विरूपाक्षं जपेत् ।। परमेष्ठी ऋषिर्न्निगद छन्द
का त्वाग्निरुद्र रूपोग्नि र्द्देवता विरूपाक्षजपे विनियोगः ।। ॐ तपश्च
तेजश्च श्रद्धा च ह्रीश्च सत्यञ्चाक्रोधश्च त्यागश्च धृतिश्च धर्म्मश्चस

राम·

त्वं च वाक् च मनश्चात्मा च ब्रह्म च· तानि प्रपद्ये तानि मामवन्तु· ॐ भू
र्भुवःस्वरोँ महान्तमात्मानं प्रपद्ये· विरूपाक्षोसि दन्तांजि स्तस्यते· शय्या
पर्णो गृहा अन्तरिक्षे विमितं हिरण्मयं· तद्देवानां हृदया-पस्मये· कुंभेन्त्र
